Bombay Sanskrit Series.

No. XLII.

THE DASAKUMARACHARITA.

PART II.

The Department of Public Instruction, Bombay.

॥ दशकुमारचरितं सटीकम् ॥

THE DAŚAKUMÂRACHARITA

OF

DAṆḌIN.

EDITED

WITH CRITICAL AND EXPLANATORY NOTES

BY

PETER PETERSON, M.A.

Part II.

Bombay:
GOVERNMENT CENTRAL BOOK DEPÔT.

1891.

Price Fourteen Annas.

BOMBAY:

PRINTED AT THE EDUCATION SOCIETY'S PRESS, BYCULLA

PREFACE.

THIS edition of Books IV. to VIII. of the Daśakumâracharita has been prepared, with Dr. Bühler's concurrence, to complete the edition of the work in the *Bombay Sanskrit Series.* Three manuscripts have been used, **A**, a manuscript in the Bhao Daji Collection of the Bombay Branch of the Royal Asiatic Society, written in Śaka 1687, **B** and **C**, two manuscripts in the Bombay Government Collection, dated respectively Samvat 1851 and Samvat 1880. Wilson's (**W**) and Godabole and Paraba's (**G**) editions have also been used, and the former has been collated throughout.

Little is known of the author of the book, Daṇḍin. His date has still to be settled. Wilson placed him in the eleventh century: more recent writers would assign him to the sixth. The older view will, I think, eventually be found to be nearer the truth. At all events, I believe it can be shown that Daṇḍin is a later writer than Vâmana, who belongs to the eighth century.

Pischel, who believes that Daṇḍin is older than Vâmana, but admits that this cannot be proved by a

comparison of the one writer's Kâvyâdarśa with the other's Kâvyâlaṃkâravṛitti, tells us that Kielhorn had pointed out to him that in Kâvyâdarśa, II. 51,

न लिङ्गवचने भिन्ने न हीनाधिकतापि वा ।
उपमादूषणायालं यत्रोद्वेगो न धीमताम् ॥

Daṇḍin would appear to be criticising part of Vâmana's rule, Kâvyâlaṃkâravṛitti iv. 2, 8, हीनत्वाधिकत्वलिङ्गवचनभेदासादृश्यासंभवास्तद्दोषाः. It might be conceded to Pischel, that these passages in the two books, if they stood alone, would not necessarily do more than disclose a difference of opinion between Daṇḍin and Vâmana, on matter of common controversy, without being conclusive as to their relative age. But the passages in question do not stand alone. At Kâvyâdarsá II. 358, 359,

अनन्वयससंदेहावुपमास्वेव दर्शितौ ।
उपमारूपकं चापि रूपकेष्वेव दर्शितम् ॥
उत्प्रेक्षाभेद एवासावुत्प्रेक्षावयवोऽपि च ।

I see a clear reference to Vâmana's teaching with regard to the figures of speech which he calls *ananvaya*, *saṃdeha*, *upamârûpakam* and *utprekshâvayava*. For Vâmana these are four separate *alaṃkâras* requiring separate treatment. Daṇḍin has made the first three fall under his general definition of *upamâ* and *rûpakam* respectively. But he deems it necessary to note that he has done so. The fourth, he says, is a mere variety of *utprekshâ*. He mentions it at all, it

is clear, only out of respect for some predecessor. In the present state of our knowledge we must, I submit, take it that that predecessor is Vâmana, and that the अनानुत्प्रेक्षावयवः of Kâvyâdarśa II. 359 is a challenge of Vàmana's *dictum* Kàvyâlaṃkàravritti IV. 3, 33, उत्प्रेक्षाहेतुरुत्प्रेक्षावयवः.

Daṇḍin's contraction of the styles of poetry to two only, the Vaidarbha and the Gauḍa varieties, appears also to me to be a reflection on Vàmana, who recognizes three, the Vaidarbha, Gauḍa and Pañchâla (Kavyâd. I. 40-43, Kâvyâl. I. 2, 9-13).*

We know from Ràjaśekhara's verse, Śàrṅgadhara paddhati 174

त्रयोग्नयस्त्रयो देवास्त्रयो वेदास्त्रयो गुणाः ।
त्रयो दाण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ॥

that Daṇḍin was celebrated as the author of three books. Two are our book and the Kàvyâdarśa. The third is still to seek. Pischel, who believes that it is

---

* Pandit Maheśchandra Nyâyaratna, in his interesting paper in the Proceedings of the Bengal Asiatic Society for 1887, p. 193, holds that it is unquestionable that Vàmana is by much the older of the two writers. He does not, however, give his reasons. The Pandit has been before me with the observation that Kàvyàdarśa II. 197,

अरत्नालोकसंहार्यमवार्यं सूर्यरश्मिभिः ।
दृष्टिरोधकरं यूनां यौवनप्रभवं तमः ॥

is a reminiscence of Bàṇa in Kàdambarì. Bombay Edition, p. 102, 116, केवलं च निसर्गत एवाभानुभेद्यमरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्. The remarks which follow on the *limpativa* verse were written before I knew of the Pandit'. paper, where the same view is taken.

the Mrichchhakaṭikâ, has to deal with an important passage in the beginning of the Kàvyâdarśa, in which Daṇḍin apparently refers to a work on metre by himself, called the Chhandovichiti. Daṇḍin's Chhandovichiti, has not come down to us, or has not yet been recovered, and it is evidence that there is a *primâ facie* possibility that it may be Râjasekhara's third book, leaving no room for the Mṛichchhakaṭikâ. Jacobi has taken this view (Indische Studien, XVII. p. 44). Pischel is disposed to think that in the passage in the Kâvyâdarśa Daṇḍin is not referring to a book at all.

I cannot think that he is right here. In Kâvyâdarśa I. 2, Daṇḍin tells us that his book is to be a compendium of previous works on *Kâvya* based on a wide study of existing poems. In v. 10 he says that his authorities divide *Kâvya* into two parts, body and soul. By the body of poetry is meant a row of words characterized by meaning of a choice kind. This leads him (v. 11) to the division of the body or material substance of Kàvya into what we call prose (*gadyam*) and poetry (*padyam*), and into the subdivision of this latter according as it is measured by syllables or by quantity. He then goes on (v. 11):

छन्दोविचित्यां सकलस्तत्प्रपञ्चो निदर्शितः ।
सा विद्या नौस्तितीर्षूणां गम्भीरं काव्यसागरम् ॥

"The full exposition of that subject (*sc. padyam*) has been given in the Chhandovichiti: that science is a ship for those who wish to cross the ocean of poetry."

Accordingly in the Kâvyâdarśa Daṇḍin says no more about the laws of metre. If I have interpreted the context rightly it seems clear that Daṇḍin is referring to a book here, as also that he can only be referring to a book of his own composition. For nothing but the fact that he was able to refer to a book of his own could account for Daṇḍin's omitting from his compendium one half of his subject, as that has just been defined by himself.

But while I think it probable that Daṇḍin wrote a Chhandovichiti, as Vâmana had done before him, I cannot hold, with any certainty, with Jacobi that we are to recognize in it the third pillar of his fame. In addition to the reference in the Kâvyâdarśa to the Chhandovichiti, as a book Daṇḍin had written, there is an equally clear reference to a work to be called the Kalâparichchheda, which Daṇḍin intended to write, Kâvyâdarśa III. 171

इत्थं कलाचतुःषष्टिविरोधः साधु नीयतां ।
तस्याः कलापरिच्छेदे रूपमाविर्भविष्यति ॥

If it should turn out that Daṇḍin did not live to write the Kalâparichchheda, Jacobi's hypothesis would recover great additional probability. But as matters stand it seems more likely that the Chhandovichiti and the Kalâparichchheda were regarded by Daṇḍin and his admirers as mere appendages to his Kâvyâdarśa, and that neither the one nor the other of them

can be the third book, on which, alongside of the Kâvyâdarśa and the Daśakumáracharita, his fame rested. It is still, therefore, necessary to examine Pischel's plea in favour of the Mṛichchhakaṭikâ. It can be shown that his argument will not bear a careful examination of the passages in the Kâvyâdarśa on which it is founded. Daṇḍin refers twice to the verse, occurring in the Mṛichchhakaṭikâ, लिम्पतीव तमोऽङ्गानि &c. If the second reference stood alone, and if the verse had not been identified, we might have been unable to say whether it was original or not. For Daṇḍin gives it there, without note or comment, as an instance of a stanza containing two or more figures of speech which are co-ordinate with each other, not subordinate, the one to the other. But he is able to do this only because he has already (II. 226 ff.) referred to, and been at great pains to refute, the opinion of previous writers, that the verse in question consists of *upamás* only, and not, as Daṇḍin holds, of two *utprekshás* and one *upamá*. The passage need not be given at length here. I will only note that Daṇḍin first gives the two examples (चेतनस्य and अचेतनस्य) required by his two-fold division of *utprekshá*. He then goes on:

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
इतीदमपि भूयिष्ठमुत्प्रेक्षालक्षणान्वितम् ॥

This can only mean

"That (well-known) verse *too* लिम्पतीव तमोऽङ्गानि is mostly* composed of *utprekshâs*."

The occurrence in the Kâvyâdarśa of a verse which is taken from the Mṛichchhakaṭikâ is not, it should be observed in passing, without a significance of its own. It does not prove that Daṇḍin was the author of the play, on the contrary. But it does go to prove that Daṇḍin, who quotes the play, cannot be a very old writer. For the Mṛichchhakaṭikâ belongs to a period when people had begun to forget how to write good Sanskrit.

Dr. Bühler pointed out to me that Mr. Lewis Rice has, Inscriptions from Śravana Belgola, p. 43, brought to light an important passage in which a verse from "Daṇḍin" in praise of a Jain writer Śrîvarddhadeva, author of a Chudâmaṇi, is quoted in an inscription which dates from the Śaka year 1050 = 1128 A.D.

य एव उपश्लोकितो दण्डिना

जह्नोः कन्या जटाग्रेण बभार परमेश्वरः ।
श्रीवर्द्धदेव संधत्से जिह्वाग्रेण सरस्वतीम् ॥

---

* भूयिष्टम्. Daṇḍin is referring to the fact that the verse has two *utprekshás* as against one *upamá*. Pischel's translation "in a high degree" and Böhtlingk's "durchaus" both seem to miss this point.

Böhtlingk takes the view I am urging against Pischel. But his argument that Daṇḍin would hardly have ascribed here a verse of his own to "a (certain) poet," vv. 223, 225, and even to "a (certain) man" rests on a misconception of the terms so translated, कविना and पुंसा. They have nothing to do with an ascription of authorship, a sense in which the latter of the two would be unique. In the figure *utprekshá* some one must, by a quaint conceit, represent something as entirely different from what it really is. कविना "the (not *a*) poet," and पुंसा "the man," *i. e.* the speaker. Daṇḍin introduces the expressions to drive home the fact that in such verses इव is exactly equal to मन्ये and the like.

Mr. Rice would use this to help to settle Śrîvarddha's date, and that of various other authors and works that are in the inscription put before his time. "Daṇḍin is placed by the best authorities in the 6th century A. D. It follows that Śrîvarddha lived either at or before that period, and that the various authors mentioned above must be understood to have preceded him." It will be evident from what has been already written that these conclusions cannot stand. There is not a shred of evidence to shew that Daṇḍin lived in the sixth century. On the contrary it is absolutely certain that he follows Bâṇa, who belongs to the early part of the seventh century; and it is, as I trust, I have shown, very probable that he is later than Vâmana, who belongs to the eighth. If the "Daṇḍin" of this inscription is our Daṇḍin, we are as likely in the end to get at his date through Śrîvarddha's as to be able to determine Śrîvarddha's from his. But I have to close these tentative remarks with the warning that the Daṇḍin of this inscription is probably not our author, but another writer of his name, who must be distinguished from him. I mean the author of the Mallikâmâruta, a play written in rivalry of Bhavabhûti's Mâlatîmâdhava, which has been printed in Calcutta, and copies of which are in the India Office Library and British Museum. Burnell has wrongly given the name of the author of that book as Ranganâtha. That was his father's name.

and the line goes up through Śrikrishṇa to Gokulnàtha. They belonged to the Tuṇḍira country, a district near Conjeeveram. All these names, taken from the preface of the Mallikàmàruta, are against the idea that we are dealing here with the author of the Daśakumàra-charita; and the style of the book in no way approaches that of our author. We must therefore hold that there were two Daṇḍins, and it seems likely that the Śravana Belgola inscription refers to the younger and less famous one.

P. PETERSON.

Elphinstone College,
Bombay, 1*st* *July* 1891.

॥ दशकुमारचरितम् ॥

देव सोहमप्येभिरेव सुहृद्भिरेककर्मोभिमालिनेभिभूमिवलयं भ्रमन्नुपासरं कदाचित्काशीपुरीं वाराणसीम् । उपस्पृश्य च मणिभङ्गनिर्मलाम्भसि मणिकर्णिकायामविमुक्तेश्वरं भगवन्तमन्धकमथनमभिप्रणम्य प्रदक्षिणं परिभ्रमन्पुरुषमेकमायामवन्तमायसपरिघपीवराभ्यां भुजाभ्यां बध्यमानपरिकरमविरतरुदितोच्छूनताम्रदृष्टिमद्राक्षम् । अतर्कयं च । कर्कशोयं पुरुषः । कार्पण्यमिव वर्षति म्लानतारं चक्षुः । आरम्भश्च साहसानुवादी । नूनमसौ प्राणनिस्पृहः किमपि कृच्छ्रं प्रियजनव्यसनमूलं प्रपित्सते । तत्पृच्छेयमेनमस्ति चेन्ममापि कोपि साहाय्यावकाशस्तमेनमभ्यवपद्येत्यपृच्छम् । भद्र संनाहोयं साहसमवगमयति । न चेद्गोप्यमिच्छामि श्रोतुं शोकहेतुमिति । स मां सबहुमानं निर्वर्ण्य को दोषः श्रूयतामिति कचित्करवीरतले मया सह निषण्णः कथामकार्षीत् ।

महाभाग सोहमस्मि पूर्वेषुकामचरः पूर्णभद्रो नाम गृहपतिपुत्रः । प्रयत्नसंवर्धितोपि पित्रा दैवच्छन्दानुवर्ती चौर्यवृत्तिरासम् । अथास्यां काशीपुर्यामर्थवर्यस्य कस्यचिद्गृहे चोरयित्वा रूपाभिग्राहितोबध्ये । बद्धे च मयि मत्तहस्ती मृत्युविजयो नाम हिंसाविहारी राजद्वारगोपुरोपरितलाधिरूढस्य पश्यतः कामपालनाम्न उत्तमामात्यस्य शासनाज्जनकण्ठरवद्विगुणितघण्टारवो मण्डलितहस्तकाण्डमभ्यधावत् । अभिपत्य च मया निर्भयेन निर्भर्त्सितः परिणमन्दारुखण्डसुषिरानुप्र-

---

1. 1. सोप्यहम् A. B.—परिभ्रमन् W.—1. 2. A omits काशीपुरीं.—W. omits च.—1. 3. प्रणम्य W.—1. 4. °घं पी° W. (a mistake).—1. 5. आबध्यमान° W.—1. 10. बहुमानं W.—1. 11. श्रूयतामिति । ततः कचित् W.—1. 14. संवर्द्धित (*sic*) पित्रा A. B omits पित्रा. C omits अपि.—चौर° W.—1. 15. C omits कस्यचित्.—बद्धः W.—1. 16. °विहारं A.—1. 18. °काण्डः. W.—1. 19. परिणतः A.—

विटोभयभुजदण्डचण्डघट्टितप्रतिमानो भीत इव न्यवर्तिष्ट । भूयश्च नेत्रा जातसंरम्भेण निकामदारुणैर्वागङ्कुशपादैरभिमुखीकृतो मयापि द्विगुणाबद्धमन्युना निर्भर्त्स्याभिहतो विवृत्यापाद्रवत्। अथ मयानुपत्य सरभसमाक्रुष्टो रुष्टः स यन्ता हन्त मृतोसि क्व यासि कुञ्जरापसदेति निशितेन वारणेन वारणं मुहुर्मुहुरभिघ्नन्निर्याणभागे कथमपि मदभिमुखमकरोत् । अपसरतु द्विरदकीट एषः । अन्यः कश्चिन्मातङ्गपतिरानीयतां येनाहं मुहूर्तं विहृत्य गच्छामि गन्तव्यां गतिमित्यवोचम् । दृष्ट्वैव स मां रुष्टमुद्गर्जन्तमुत्क्रान्तयन्तृनिष्ठुराज्ञः पलायिष्ट । मन्त्रिणा पुनरहमाहूयाभ्यधायिषि । भद्र मृत्युरिवैष मृत्युविजयो हिंसाविहारी । सोयमपि नाम त्वयैवंभूतः कृतः । तद्विरम्य कर्मणोस्मान्मलीमसात्किमलमसि प्रपद्यास्मानार्यवृत्त्या वर्तितुमिति । यथाज्ञापितोस्मीति विज्ञापितोयं मया मित्रवन्मय्यवर्तिष्ट ।

मयैकदा रहसि जातविश्रम्भेण पृष्टः सोभाषत स्वचरितम् । आसीत्कुसुमपुरे राज्ञो रिपुंजयस्य मन्त्री धर्मपालो नाम विश्रुतधीः श्रुतर्षिः । अमुष्य पुत्रः सुमित्रो नाम पित्रैव समः प्रज्ञागुणेषु । तस्यास्मि द्वैमातुरः कनीयान्भ्राताहम् । वेशेषु विलसन्तं मां विनयरुचिरसाववारयत् । पुनरवार्यदुर्नयश्चाहमपसृत्य दिङ्मुखेषु भ्रमन्यदृच्छयास्यां वाराणस्यां प्रमदवने मदनदमनाराधनाय निर्गत्य सह सखीभिः कन्दुकेन परिक्रीडमानां काशीभर्तुश्चण्डसिंहस्य कन्यां कान्तिमतीं नामा-

---

2. 1. A omits चण्ड.—आघट्टित C.—2. 2. पादपातनैः C. पादपातैः W.—2. 3. द्विगुणाविद्धमन्युना A. द्विगुणमन्युना C.—निपत्य A. C omits the word.—2. 4. रुष्टश्च यन्ता W.—2. 6. द्विपकीट C. अथावोचं । अपसरतु &c. B. अथापसरतु द्विरदवराकः W.—2. 8. °यन्त्री° A. उत्क्रामन्तं यन्तृ° W.—2. 10. तावत् for नाम W. C omits the word.—विरम C. W.—2. 12. यथाज्ञापयसीति C. यथाज्ञापयति तथेति W.—2. 13. पृष्टश्च मयैकदा &c. C.—2. 14. नाम वेदश्रुतऋषिः B. नाम श्रुत ऋषिः C.—2. 15. W omits अस्मि.—2. 16. असौ विनयरुचिः W.—2. 17. पुनरवार्यां (*sic*) A. अवार्यः (omitting पुनर्) W.—उपसृत्य W.—2. 18. A omits दमन.—2 19. अनुक्रीडमाना W.—कन्या कान्तिमती नाम चकमे W.

चक्रमे । कथमपि समगच्छे च । अथ छन्नं विहरता कुमारीपुरे सा मयासीदापन्नसत्त्वा । कंचित्सुतं च सूतवती । मृतजात इति सोपविद्धस्तया रहस्यनिर्भेदभयात्परिजनेन क्रीडाशैले शबर्या श्मशानाभ्याशं नीतः । तथैव च निवर्तमानया निशीथे राजवीथ्यामारक्षिकपुरुषैरभिगृह्य तर्जितया दण्डपारुष्यभीतया निर्भिन्नप्रायं रहस्यम् । राजाज्ञयाहमाक्रीडनगिरिदरीगृहे विश्रब्धप्रसुप्तस्तयोपदर्शितः । यथोपपन्नरज्जुबद्धः श्मशानमुपनीय मातङ्गोद्यतेन कृपाणेन प्राजिहीर्ष्ये । नियतिबलाल्लूनबन्धनस्तमसिमाच्छिद्यान्त्यजं तमन्यांश्च कांश्चित्प्रहत्यापासरम् । अशरणश्च भ्रमन्नटव्यामेकदोदश्रुमुख्या दिव्याकारया कन्यया सपरिवारयोपास्थायिषि । सा मामञ्जलिकिसलयोत्तंसितेन मुखविलोलकुन्तलेन मूर्ध्ना प्रणिपत्य मया सह वनवटद्रुमस्य कस्यापि महतः प्रच्छायशीतले तले निषण्णा कासि वासु कुतोस्यागता कस्य हेतोरस्य मे प्रसीदसीति साभिलाषमाभाषिता मया वाङ्मयं मधुवर्षमवर्षत् ।

नाथ नाथस्य यक्षाणां मणिभद्रस्यास्मि दुहिता तारावली नाम । साहं कदाचिदगस्त्यपत्नीं लोपामुद्रां नमस्कृत्यापावर्तमाना मलयगिरेः परेतावासे वाराणस्यां कमपि दारकं रुदन्तमद्राक्षम् । आदाय चैनं तीव्रस्नेहा मम पित्रोः संनिधिमनैषम् । अनैषीच्च तातो मे मां देवस्यालकेश्वरस्यास्थानीम् । अथाहमाहूयाज्ञप्ता हरसखेन । बाले बालेस्मिन्भावस्ते कीदृश इति । औरस इवास्मिन्वत्से वत्सलतेति मया विज्ञापितः सत्यमाह वराकीति तन्मूलामतिमहतीं कथामकरोत् । तत्रैतन्मयावगतम् । त्वं किल शौनकः शूद्रकः कामपालश्चाभिन्नः ।

---

3. 1. चक्रमे B. C.—A omits च.—अथ छन्नं च A. B. W.—3. 3. श्मशानमानीतः W.—3. 4. W omits च.—3. 8. °बन्धः. W.—3. 9. एकदाश्रुमुख्या कयापि दिव्याकारया सपरिवारया कन्ययोपास्थापिषि W.—3. 11. प्रणम्य W.—महावन° W. A omits वन.—3. 12. B W omit तले.—3. 15. आर्य नाथस्य B. W.—3. 17. वाराणस्याः W.—3. 18. तीव्रस्नेहात् W.—W omits मां. C omits मे.—3. 20. कीदृशस्ते भाव इति W.—3. 22. तत्रैतावदवगतं मया W.—

बन्धुमती विनयवती कान्तिमती चाभिन्ना । वेदवत्यर्यदासी सोमदेवी चैकैव । हंसावली शूरसेना सुलोचना चानन्या । नन्दिनी रङ्गपताकेन्द्रसेना चापृथग्भूता । या किल शौनकावस्थायामग्निसाक्षिकमात्मसात्कृता गोपकन्या सैव किलार्यदासी पुनश्चाद्य तारावलीत्यभूवम् । बालश्च किल शूद्रकावस्थे त्वय्यार्यदास्यवस्थायां मय्युदभूत् । अवर्ध्यत च विनयवत्या । स्नेहवासनया तु तस्यां कान्तिमत्यवस्थायामद्योदभूत् । एवमनेकमृत्युमुखपरिभ्रष्टं दैवान्मयोपलब्धः । तमेकपिङ्गादेशाद्वने तपस्यतो राजहंसस्य देव्यै वसुमत्यै तत्सुतस्य भाविचक्रवर्तिनो राजवाहनस्य परिचर्यार्थं समर्प्य गुरुभिरभ्यनुज्ञाता कृतान्तयोगात्कृतान्तमुखभ्रष्टस्य ते पादपद्मशुश्रूषार्थमागतास्मीति ।

तच्छ्रुत्वा तामनेकजन्मरमणीमसकृदाश्लिष्य हर्षाश्रुमुखो मुहुर्मुहुः सान्त्वयित्वा तत्प्रभावदर्शिते महति मन्दिरेहर्निशमिन्द्रदुर्लभान्भोगानन्वभूवम् । द्वित्राणि दिनान्यतीत्य मत्तकाशिनीं तामवादिषम् । प्रिये प्रत्यपकृत्य मत्प्राणद्रोहिणश्चण्डसिंहस्य वैरनिर्यातनसुखमनुबुभूषामीति । तया सस्मितमेहि कान्त कान्तिमतीदर्शनाय नयामि त्वामिति स्थितेर्धरात्रे राज्ञो वासगृहमनीये । ततस्तस्य चण्डसिंहस्य शिरोभागवर्तिनीमसियष्टिमादाय प्रबोध्यैनं प्रस्फुरन्तमब्रवम् । अयमस्मि भवज्जामाता । भवदनुमत्या विना तव कन्याभिमर्शी । तमपराधमनुवृत्त्या प्रमार्ष्टुमागत इति । सोथ भीतो मामभिप्रणम्याह । अहमेव मूढोपराद्धो यस्तव दुहितृसंसर्गानुग्राहिणो ग्रहग्रस्त इवोत्क्रान्तसीमा

4. 1. दत्तवती यज्ञदासी A. वेगवती अर्यदासी C. वेदिमती यज्ञदासी W.—4. 2. A. B C omit च.—गोपकन्या for सुलोचना C. W.—चाद्वितीया W. C.—4. 4. चाग्निसाक्षिकं A.—4. 5. बालकश्च A.—4. 6. अभूत् A.—अवर्द्धत W.—स तु W.—4. 7. अनेकमृत्युहस्तमुक्तो दैवान्मयोपलब्धः A. एवमेनं मृत्युमुख° &c. C.—4. 10. परिभ्रष्टस्य C. W.—4. 12. इति श्रुत्वा W. 4. 13. भूमिदुर्लभान् C. W.—4. 14. अतिक्रम्य C. W.—4. 15. प्रत्युपकृत्य W.—4. 16. सस्मितमभिहितं C. W.—4. 17. ततस्तच्छिरः° C. W.—4. 18. आदायासियष्टिं C. W.—अहमस्मि C. W.—4. 20. सोतिभीतः C. W.—4. 21. मूढापराद्धः W.—

स्वयमेव समादिष्टवान्वधम् । तदास्तां कान्तिमती । राज्यमिदं मम जीवितमप्यद्यप्रभृति भवदधीनमित्यवादीत् । अथापरेद्युः प्रकृतिमण्डलं संनिधाप्य विधिवदात्मजायाः पाणिमग्राहयत् । अश्रावयच्च तनयवार्तां तारावली कान्तिमत्यै सोमदेवीसुलोचनेन्द्रसेनाभ्यश्च पूर्वजातिवृत्तान्तम् । इत्थमहं मन्त्रिपदापदेशं यौवराज्यमनुभवन्विहरामि विलासिनीभिरिति ।

स एवं मादृशेपि जन्तौ परिचर्यानुबन्धी बन्धुरेकः । सर्वभूतानामलसकेन स्वर्गते श्वशुरे ज्यायसि श्याले चण्डघोषनाम्नि स्त्रीष्वतिप्रसङ्गात्प्रागेव क्षयक्षीणायुषि पञ्चवर्षदेशीयं सिंहघोषनामानं कुमारमभ्यषेचयत् । अवर्धयच्च विधिनैनं स साधुः । तस्याद्य यौवनोन्मादिनः पैशुन्यवादिनो दुर्मन्त्रिणः कतिचिदासन्नन्तरङ्गभूताः । तैः किलासावित्थमग्राह्यत । प्रसह्यैव स्वसा तेमुना भुजंगेन संगृहीता । पुनः प्रसुप्ते राजनि प्रहर्तुमुद्यतासिरासीत् । तेनास्मै तत्क्षणप्रबुद्धेन भीत्यानुनीय दत्ता कन्या । तं च देवज्येष्ठं चण्डघोषं विषेण हत्वा बालोयमसमर्थ इति त्वमद्यापि प्रकृतिविश्रम्भणायोपेक्षितः । क्षिणोति पुरा स कृतघ्नो भवन्तम् । तमेवान्तकपुरमभिगमयितुं यतस्वेति । स तथा दूषितोपि यक्षिणीभयान्नामुष्मिन्पापमाचरितुमशकत् । एषु किल दिवसेष्वयथापूर्वमाकृतौ कान्तिमत्याः समुपलक्ष्य राजमहिषी सुलक्षणा नाम सप्रणयमपृच्छत् । देवि नाहमायथातथ्येन विप्रलम्भनीया । कथय तथ्यं केनेदमायथापूर्व्यमाननारविन्दे तवैषु वासरेष्विति । सा तु भद्रे स्मरसि किमायथातथ्येन किंचिन्मयोक्तपूर्वम् । सखी मे तारावली सपत्नी च किमपि कलुषिताशया रहसि भर्त्रा

5. 1. C omits स्वयमेव.—मम च (omitting अपि) C. W.—5. 2. त्वदधीनं C. W.—5. 4. C omits जाति.—5. 5. °पदापदेशात् C.—5. 8. ज्यायसि च C. W.—5. 9. पञ्चवर्षं A. B.—5. 12. तवामुना C. W.—5. 13. तेनैव दैवात्तत्क्षण° C. तेनैवास्मै दैवात्तत्क्षण° W.—5. 14. प्रदत्ता A. B. कन्या दत्ता W.—5. 15. क्षिणोति च C. B has a gap here extending to अभिगृह्य पूर्णभद्रमब्रवं p. 6, l.16.—5. 17. °प्रभावात् C. प्रभावभयात् W.—5. 18. समुपलभ्य A. समुल्लक्ष्य (*sic*) C.—5. 19. अयथातथ्येन W.—5. 20. अयथापूर्वं W.—5. 21. सा त्ववदीत् W.—अयथातथ्येन A.—

मद्गोत्रापदिष्टा प्रणयमभ्युपेक्ष्य प्रणम्यमानाप्यस्माभिरुपोढमत्सरा प्रावसत् । अवसीदति च नः पतिः । अतो मे दौर्मनस्यमिति । तत्प्रायेणैकान्ते सुलक्षणया कान्ताय कथितम् । अथासौ निर्भयोद्य प्रियतमाविरहपाण्डुभिरवयवैर्धैर्यस्तम्भिताश्रुपर्याकुलेन चक्षुषोष्मश्वासशोषिताभिरिव नातिपेशलाभिर्वाग्भिर्वियोगं दर्शयन्तं कथमपि राजकुले कार्याणि कारयन्तं पूर्वसंकेतितैः पुरुषैरभिग्राह्यावन्धयत् । तस्य किल स्थानस्थानेषु दोषानुद्धोष्य तथोद्धरणीये चक्षुषी यथा तन्मूलमेवास्य मरणं भवेदिति । अतोत्रैकान्ते यथेष्टमश्रु मुक्त्वा तस्य साधोः पुरः प्राणान्मोक्तुकामो बध्नामि परिकरमिति ।

मयापि मत्पितृव्यसनमाकर्ण्य पर्यश्रुणा सोभिहितः । सौम्य किं तव गोपयित्वा । यस्तस्य सुतो यक्षकन्यया देवस्य राजवाहनस्य पादशुश्रूषार्थं देव्या वसुमत्या हस्तन्यासः कृतः सोहमस्मि । शक्यामि सहस्रमपि भटानामुदायुधानां हत्वा पितरं मोचयितुम् । अपि तु संकुले यदि कश्चित्पातयेत्तदङ्गे शस्त्रिकां सर्व एव मे यत्नो भस्मनि हुतमिव भवेत् । इत्यनवसितवचन एव मयि महानाशीविषः प्राकाररन्ध्रेणोदैरयच्छिरः । तमहं मन्त्रौषधिबलेनाभिगृह्य पूर्णभद्रमब्रवम् । भद्र सिद्धं नः समीहितम् । अनेन तातमलक्ष्यमाणः संकुले यदृच्छया पतितेन नाम दंशयित्वा तथा विषं स्तम्भयेयं यथा मृत इत्युदास्येत । त्वया मुक्तसाध्वसेन माता मे बोधयितव्या । यः स यक्ष्या वने देव्या वसुमत्या हस्तार्पितो युष्मत्सूनुः सोनुप्राप्तः । पितुरवस्थां मदुपलभ्य बुद्धिबलादित्थमाचरिष्यति । त्वया तु मुक्तसाध्वसया राज्ञे प्रेषणीयम् । एष खलु क्षत्रधर्मो यद्बन्धुरबन्धुर्वा दुष्टः स निरपेक्षं निग्राह्य इति । स्त्रीधर्मश्चैष यद्दुष्टस्यादुष्टस्य वा भर्तुर्ग-

---

6. 2. अतोस्या मे A. अतोस्ति मे W.—6. 7. स्थानेषु C.—दोषं C. W.—6. 10. तत्पितृ° W.—6. 11. गोपायित्वा W.—6. 18. पातितेन W.—6. 19. इत्युच्येत A. उदास्येच्च B.—त्वया तु B. W.—6. 21. मुक्तत्रासया W. मुक्तत्रासयोक्त्वा C.—6. 23. A omits वा. अदुष्टस्य दुष्टस्य C. W.—

तिर्गन्तव्येति । तदहममुनैव सह चिताग्निमारोक्ष्यामि । अभिजनानुरूपः पश्चिमो विधिरनुज्ञातव्य इति । स एवं निवेदितो नियतमनुज्ञास्यति । ततः स्वमेवागारमानीय काण्डपटपरिक्षिप्ते विविक्तोद्देशे दर्भसंस्तरमधिशाय्य स्वयं कृतानुमरणमण्डनया च तत्र संनिधेयमिति । अहं च बाह्यकक्ष्यागतस्त्वया प्रवेशयिष्ये । ततः पितरमुज्जीव्य तदभिरुचितेनाभ्युपायेन चेष्टिष्यामह इति । स तथेति हृष्टतरस्तूर्णमभ्यगमत् ।

अहं तु घोषणास्थाने चिञ्चावृक्षं लम्बवनतरविपुलशाखमारुह्य गूढतनुरतिष्ठम् । आरूढश्च लोको यथायथमुच्चस्थानानि । उच्चावचप्रलापः प्रस्थितः । तावन्मे पितरं तस्करमिव पश्चाद्बद्धभुजमुद्धुरध्वनिमहाजनानुयातमानीय मदभ्याश एव स्थापयित्वा मातङ्गास्त्रिरघोषयत् । एष मन्त्री कामपालो राज्यलोभाद्भर्तारं चण्डसिंहं युवराजं चण्डघोषं विषेणोपांशु हत्वा पुनर्देवोपि सिंहघोषः पूर्णयौवन इत्यमुष्मिन्पापमाचरिष्यन्विश्वासाद्रहस्यभूमौ पुनरमात्यं शिवनागमाहूय स्थूणमङ्गारवर्षं च राजवधायोपजप्य तैः स्वामिभक्तया विवृतगुह्यो राज्यकामुकस्य ब्राह्मणस्यान्धतमसप्रवेशो न्याय्य इति प्राड्विवाकवाक्यादक्ष्युद्धरणाय नीयते । पुनरन्योपि यः स्यादन्यायवृत्तिस्तमप्येवमेव यथार्हेण दण्डेन योजयिष्यति देव इति । श्रुत्वैतद्बद्धकलकले महाजने पितुरङ्के प्रदीप्तशिखमाशीविषं व्यक्षिपम् । अहं तु भीतो नामावप्लुत्य तत्रैव जनानुलीनः क्रुद्धव्यालदष्टस्य तातस्य विहितजीवरक्षो विषं क्षणादस्तम्भयम् । अपतच्च स भूमौ मृतकल्पः । प्रालपं च सत्यमिदं राजावमानिनं दैवो दण्ड एव स्पृशति । यदयमक्षिभ्यामवनिपेन विना चिकीर्षितः प्राणैरेव वियोजितो विधिनेति । मदुक्तं च केचिदन्वम-

---

7. 1. युवतिजनानुरूपः C.—7. 4. °मण्डनया त्वया तत्र च W. °मण्डनया त्वया च तत्र C.—7. 6. उपायेन C. W.—7. 8. C W omit लम्ब.—7. 16. अस्य ब्राह्मणस्य C. W.—7. 17. यदि स्यात् W.—7. 19. अहं च C. W.—7. 21. अपतच्चैष B. A omits स. It is supplied in the margin.—7. 22. स्पृशतीति B. W.—अक्षिभ्यां विनावनि (C. नी) पतिना C. W.—

न्यन्त । अपरे पुनर्निनिन्दुः । दर्वीकरस्तु तमपि चण्डालं दष्ट्वारूढत्रासद्रुतलोकदत्तमार्गः प्राद्रवत् ।

अथ मदम्बा पूर्णभद्रप्रबोधितार्था तादृशेपि व्यसने नातिविह्वलाल्पपरिजनानुयाता पद्भ्यामेव सधीरमागत्य मत्पितुरुत्तमाङ्गमुत्सङ्गेनोपधारयन्ती स्थिता राज्ञे समादिशत् । एष मे पतिस्तवापकर्ता न वेति देवो जानाति । न मेनयास्ति चिन्तया फलम् । अस्य तु पाणिग्राहकस्य गतिमननुप्रपद्यमाना भवत्कुलं कलङ्कयेयम् । अतोनुमन्तुमर्हसि भर्त्रा सह चिताधिरोहणाय मामिति । श्रुत्वा चैतत्प्रीतियुक्तः प्रतिसमादिक्षत्क्षितीशः । क्रियतां कुलोचितः संस्कारः । उत्सवोत्तरं च पश्चिमं विधिसंस्कारमनुभवतु मे भगिनीपतिरिति । चण्डाले तु मत्प्रतिषिद्धसकलमन्त्रवादिप्रयासे संस्थिते कामपालोपि कालदष्ट एवेति स्वभवनोपनयनमप्यमुष्य स्वमाहात्म्यप्रकाशनाय महीपतिरन्वमंस्त । नीतश्च पिता मे विविक्तायां भूमौ दर्भसंस्तरमधिशयानः स्थितोभूत् । अथ मदम्बा मरणमण्डनमनुष्ठाय सकरुणं सखीरामन्त्र्य मुहुरभिप्रणम्य भवनदेवतां यत्नेन निवार्य परिजनाक्रन्दितानि पितुर्मे शयनस्थानमेकाकिनी प्राविशत् । तत्र च पूर्वमेव पूर्णभद्रोपस्थापितेन मया वैनतेयतां गतेन निर्विषीकृतं भर्तारमैक्षत । दृष्टतमा च पत्युः पादयोः पर्यश्रुमुखी निपत्य मां च प्रस्नुतस्तनी मुहुर्मुहुः परिष्वज्य सहर्षबाष्पगद्गदमगदत् । पुत्र योसि जातमात्रः पापया मया परित्यक्तः स किमर्थमेवं मां निर्घृणामनुगृह्णासि । अथवैष ते निरपराध एव जनयिता । युक्तमस्य प्रत्यानयनमन्तकाननात् । क्रूरा खलु तारावली या त्वामुपलभ्यापि तत्त्वतः कुबेरादसमर्प्य मह्यम-

8. 3. कुलपरिजन° W. His MS. B has our reading.—W omits एव.—धीरं W.—धारयन्ती W.—उत्सङ्गे धारयन्ती C.—8. 6. देव एव B. दैवमेव W.—8. 9. क्षितीश्वरः C. W.—8. 13. आनीतश्च C. W.—8. 15. भवनदेवताः C. W.—परिजनाक्रन्दितं C. परिजनक्रन्दितं W.—8. 16. प्राविक्षत् C. W.—W omits च, reading च मया in the next line.—8. 17. वैनतेयतागतेन W. from his MS. A. His other MSS. have our reading.—8. 18. प्रणिपत्य W.—8. 20. A C omit मया.—अतिनिर्घृणां W.—अथैष A. C.—

र्पितवती देव्यै वसुमत्यै । सैव वा सदृशकारिणी । नहि तादृशाज्ञाग्यराशेर्विनास्मादृशो जनोल्पपुण्यस्तवार्हति कलप्रलापामृतानि कर्णाभ्यां पातुम् । एहि मां परिष्वजस्व । इति भूयो भूयः शिरसि जिघ्रन्त्यङ्कमारोपयन्ती तारावलीं गर्हयन्त्यश्रुभिरभिषिञ्चन्त्युत्कम्पिताङ्गयष्टिरन्यादृशीव क्षणमजनिष्ट । जनयितापि नरकादिव स्वर्गं तादृशाद्व्यसनात्तथाभूतमभ्युदयमधिरूढः पूर्णभद्रेण च विस्तरेण यथावृत्तमावेदितो भगवतो मघवतोपि भाग्यवन्तमात्मानमजीगणत् । मनागेव च मत्संबन्धमाख्याय हर्षविस्मितात्मनोः पित्रोरकथयम् । आज्ञापयतं काद्य नः प्रतिपत्तिरिति । पिता मे प्राब्रवीत् । वत्स गृहमेवेदमस्त्यतिदीर्घमतिविशालशालवलयमक्षय्यायुधस्थानम् । अलङ्घ्यतमा च गुप्तिः । उपकृताश्च मयातिबहवः सन्ति सामन्ताः । प्रकृतयश्च भूयस्यो न मे व्यसनमनुरुध्यन्ते । सुभटानां चानेकसहस्रमस्त्येव ससुहृत्पुत्रदारम् । अतोत्रैव कतिपयान्यहानि स्थित्वा बाह्याभ्यन्तरकोपानुत्पादयिष्यामः । कुपितांश्चोपसंगृह्य प्रोत्साह्यास्य प्राक्तनामित्रानुत्थाप्य सहजान्द्विषो दुर्दान्तमेनमुच्छेत्स्याम इति । को दोषस्तथास्त्विति तातस्य मतमन्वमंसि ।

तथास्मासु प्रतिविधाय तिष्ठत्सु राजापि विज्ञापितोदन्तो जातानुतापः पारग्रामिकान्प्रयोगान्प्रायः प्रायुङ्क्त । ते चास्माभिः प्रत्यहमहन्यन्त । अस्मिन्नेवावकाशे पूर्णभद्रमुखाच्च राज्ञः शय्यासनस्थानमवगम्य तदैव स्वोदवसितभित्तिकोणादारभ्योरगास्येन सुरङ्गामकरवम् । गता च सा भूमिस्वर्गकल्पमनल्पकन्याजनं कमप्युद्देशम् । अव्यथिष्ट च दृष्ट्वैव स मां नारीजनः । तत्र काचिदिन्दुकलेव रसातलान्ध-

9. 2. मादृशो W.—9. 6. आरूढः W.—9. 7. मनागिव B. C.—9. 8. आत्मना corrected into आत्मनो (*sic*) A.—आज्ञापयत A. W.—9. 9. स्वगृहं A.—अस्मदीयं for अतिदीर्घं C. W.—9. 10. आयुधग्रामं A.—9. 14. C omits प्रोत्साह्य.—प्रकृत्यामित्रान् C. W. प्राकृतान्मित्रान् (*sic*) A.—9. 18. A omits च.—9. 19. अवसरे C. W.—C W omit आसन.—9. 20. तदैव प्रभृति A. W.—C omits उरगास्येन.—9. 22. इन्दुलेखेव W.—

कारमात्मलावण्येन निर्धुनाना विग्रहिणीव देवी विश्वंभरा हरगृहिणीवासुरविजयायावतीर्णा पातालमागता गृहिणीव भगवतः कुसुमधन्वनो राज्यलक्ष्मीरिवानेकदुर्नृपदर्शनपरिहरणाय महीविवरं प्रविष्टा निष्टप्तकनकपुत्रिकेवावदातकान्तिः काचित्कन्यका चन्दनलतेव मलयमारुतेन मद्दर्शनेनोदकम्पत। तथाभूते च तस्मिन्नङ्गनासमाजे कुसुमितेव काशयष्टिः पाण्डुशिरसिजा स्थविरा कापि पादयोर्निपत्य त्रासदीनमब्रूत। दीयतामभयमस्मा अनन्यशरणाय स्त्रीजनाय। किमसि देवकुमारो दनुजयुद्धतृष्णया रसातलं विविक्षुः। आज्ञापय कोसि कस्य हेतोरागतोसीति। सा तु मया प्रत्यवादि। मा स्म भवत्यो बिभयुः। अयमहमस्मि द्विजातिवृषात्कामपालाद्देव्यां कान्तिमत्यामुत्पन्नोर्थपालो नाम। सत्यर्थे निजगृहान्नृपगृहं सुरङ्गयोपासरन्निहान्तरे वो दृष्टवान्। काः स्थ यूयम्। कथमिह निवसथेति। सोदञ्जलिरुदीरितवती। भट्टारक भाग्यवत्यो वयं यास्त्वामेभिरेव चक्षुर्भिरनघमद्राक्ष्म। श्रूयताम्। यस्तव मातामहश्चण्डसिंहस्तेनास्यां देव्यां लीलावत्यां चण्डघोषः कान्तिमतीत्यपत्यद्वयमुदपादि। चण्डघोषस्तु युवराजोत्यासङ्गादङ्गनासु राजयक्ष्मणा क्षयमगादन्तर्वत्न्यां देव्यामाचारवत्याम्। अमुया चेयं मणिकर्णिका नाम कन्या प्रसूता। अथ प्रसववेदनया मुक्तजीविताचारवती पत्युरन्तिकमगात्। अथ चण्डसिंहो देवो मामाहूयोपह्वरे समाज्ञापयत्। ऋद्धिमति कन्यकेयं कल्याणलक्षणा। तामिमां मालवेन्द्रनन्दनाय दर्पसाराय विधिवद्वर्धयित्वा दित्सामि। बिभेमि च कान्तिमतीवृत्तान्तादारभ्य कन्यकानां प्रकाशावस्थापनात्। अत इयमरातिव्यसनाय कारिते महति भूमिगृहे कृत्रिमशैलगर्भोत्कीर्णनानामण्ड-

10. 1. स्वलावण्येन C. W.—वसुन्धरा W.—हरि° A. हरेः B.—10. 2. °अवतीर्णस्य पातालभागं B.—10. 4. W omits काचित्.—10. 6. काचिचरणयोर्मे C W.—10. 10. भैषुः C. W.—A omits अयं.—°वृषभात् C. W.—10. 12. कथय काः C. कथयत काः W.—10. 13. भट्टाकर (*sic*) A. भर्तृदारक C. W.—10. 19. अगमत C. W.—देवश्चण्डसिंहो W.—10. 21. C W omit विधिवत्.—

पप्रेक्षागृहे प्रचुरपरिबर्हया भवत्या संवर्ध्यताम् । अस्त्यत्र भोग्यवस्तु वर्षशतोपभोगेनाप्यक्षय्यमिति । स तथोक्तं निजवासगृहस्य द्व्यङ्गुल-भित्तावर्धपादं किष्कुविष्कम्भमुद्धृत्य तेनैव द्वारेण स्थानमिदमस्मानवी-विशत् । इह च नो वसन्तीनां द्वादश समाः समत्ययुः । इयं च वत्सा तरुणीभूता । न चाद्यापि स्मरति राजा । काममियं पितामहेन संक-ल्पिता दर्पसाराय । त्वदम्बया कान्तिमत्या चेयं गर्भस्थैव द्यूतजिता तवैव जायात्वेन स्वमात्रा समकल्प्यत । तदत्र प्राप्तरूपं चिन्तयतु कुमार एवेति । तां पुनरवोचम् । अद्यैव राजगृहे किमपि कार्यं साधयित्वा प्रतिनिवृत्तो युष्मासु यथार्हं प्रतिपत्स्य इति । तेनैव दीपदर्शितेन बिलपथेन गत्वा स्थितेऽर्धरात्रे तदर्धपादमुद्धृत्य वास-गृहं प्रविष्टो विश्रब्धप्रसुप्तं सिंहघोषं जीवग्राहमग्रहीषम् । आकृष्य च तमहिमिवाहिशत्रुः स्फुरन्तममुनैव भित्तिरन्ध्रपथेन स्त्रैणसंनिधिमनै-षम् । आनीय च स्वभवनमायसनिगडसंदानितचरणयुगलमवनमित-मलिनवदनमश्रुबहलरक्तचक्षुषमेकान्ते जनयित्रोर्ममादर्शयम् । अक-थयं च बिलकथाम् । अथ पितरौ नितरां हृष्टौ तं निकृष्टाशयं निशाम्य नियम्य बन्धने क्षिप्त्वा तस्या दारिकाया यथार्हेण कर्मणा पाणिं ममा-ग्राहयताम् । अनायकं च तद्राज्यमस्मदायत्तमेव जातम् । प्रकृतिको-पभयात्तु मम मात्रामुमुक्षितोऽपि न मुक्त एव सिंहघोषः । तथा स्थिता-श्च वयम् । अङ्गराजः सिंहवर्मा देवपादानां भक्तिमान्कृतकर्मा चेत्यमित्राभियुक्तमेनमभ्यसराम । अभूवं च भवत्पादपङ्कजरजोनु-ग्राह्यः । स चेदानीं भवच्चरणप्रणामप्रायश्चित्तमनुतिष्ठतु सर्वदुश्चरित-क्षालनमनार्यः सिंहघोष इत्यर्थपालः प्राञ्जलिः प्रणनाम । देवोऽपि रा-

---

11. 2. वर्षशतेनाप्यक्षय्यं C.—उपभोग° W.—W. omits स.—तथो (*sic*) B. तथोक्त्वा C. W.—निजवासगृहस्याङ्गणभित्तावर्द्धपादं W.—11. 6. दर्पसाराय संकल्पिता C. W.—11. 8. A B omit राजगृहे.—11. 10. प्रत्युद्धृत्य C. W.—11. 11. °सुप्तं C.—11. 12. अहमिव W.—11. 13. °संदित° A.—11. 15. पितरौ प्रहृष्टतरौ C. W.—11. 16. B omits नियम्य. बन्धने नियम्य (omitting क्षिप्त्वा) C. W.—मां पाणिमग्राहयेताम् W. पाणिं मामग्राहयताम् B.—11. 18. मन्मात्रा C. W.—

जवाहनो बहु पराक्रान्तं बहूपयुक्ता च बुद्धिर्मुक्तबन्धनस्ते श्वशुरः पश्यतु मामित्यभिधाय भूयः प्रमतिमेव पश्यन्प्रीतिस्मेरः प्रस्तूयतां तावदात्मीयं चरितमित्याज्ञापयत् ।

इति श्रीदण्डिनः कृतौ दशकुमारचरितेर्थपालचरितं नाम चतुर्थ उच्छ्वासः ।

सोऽपि प्रणम्य विज्ञापयामास । देव देवस्यान्वेषणाय दिक्षु भ्रमन्नभ्रंकषस्यापि विन्ध्यपादपार्श्वरूढवनस्पतेरधः परिणतपतङ्गबालपल्लवावतंसिते पश्चिमदिगङ्गनामुखे पल्वलाम्भस्युपस्पृश्योपास्य संध्यां तमःसमीकृतेषु निम्नोन्नतेषु गन्तुमक्षमः क्ष्मातले किसलयैरुपरचय्य शय्यां शिशयिषमाणः शिरसि कुर्वन्नञ्जलिं यास्मिन्वनस्पतौ वसति देवता सैव मे शरणमस्तु शरारुचक्रचारभीषणायां शर्वगलश्यामशार्वरान्धकारपूराध्मातगभीरगह्वरायां महाटव्यामस्यामेकाकिनः प्रसुप्तस्येत्युपधाय वामभुजमशयिषि । ततः क्षणादवनितलदुर्लभेन स्पर्शेनासुखयिषत किमपि गात्राणि । आह्लादयिषतेन्द्रियाणि । अभ्यमनायिष्ट चान्तरात्मा । विशेषतश्च हर्षितानि तनूरुहाणि । पर्यस्फुरन्मे दक्षिणभुजः । कथं न्विदमिति मन्दमन्दमुन्मिषन्नुपर्यच्छचन्द्रातपच्छेदकल्पं शुक्लांशुकवितानमैक्षिषि । वामतो वलितदृष्टिः समया सौधभित्तिं चित्रास्तरणशायिनमतिविश्रब्धप्रसुप्तमङ्गनाजनमलक्षयम् । दक्षिणतो दत्तचक्षुरागलितस्तनांशुकाममृतफेनपटलपाण्डुरशयनशायिनीमादिवराहदंष्ट्रांशुजाललग्नामंसस्रस्तदुग्धसागरदुकूलोत्तरीयां भयसाध्वसमूर्छितामिव धरणीमरुणाधरमणिकिरणबालकिसलयलास्यहेतुभिराननारविन्दपरिमलोद्वहैर्निश्वासमातरिश्वभिरीश्वरेक्षणदहनदग्धं स्फुलिङ्गावशेषमनङ्गमिव संधुक्षयन्तीमन्तःसुप्तषट्पदमम्बुजमिव जातनिद्रं सरसमामीलितलोचनेन्दीवरमाननं दधानामैरावतमदावलेपलूनापविद्धामिव नन्दनवनकल्पवृक्षरत्नवल्लरीं कामपि तरुणीमवालोकयम् । अतर्कयं च । क्व गता सा महाटवी । कुत इदमूर्ध्वाण्डकपालसंपुटोद-

---

13. 1. W places the first sentence in the last uchchhvâsa.—13. 2. विन्ध्यपादस्य पार्श्वे A. C omits पाद. विन्ध्यपार्श्वारूढस्य वनस्पतेः W.—13. 4. क्षमा C. W.—13. 5. यस्मिन् W.—13. 7. अस्यां महाटव्यां C. W. B omits अस्यां.—मे प्रसुप्तस्य C. W.—13. 8. C W omit तल.—13. 10. हर्षितास्तनूरुहाः C. W.—13. 14. °स्तनां C.—13. 16. किरणजाल C.—13. 17. उद्गाहिभिः C.—दग्ध° A.—13. 18. जातनिद्रां A. W. जातनिमीलितलोचनोत्पलं (*sic*) B.—13. 19. सरसां A.—13. 20. °मञ्जरीं C. W.—आलोकयं C. W.—13. 21. B W omit उदर.—

रोल्लिखि शक्तिध्वजशिखरशूलोत्सेधं सौधमागतम् । क्व च तदरण्यस्थलीसमास्तीर्णं पर्णशयनम् । कुतस्त्यं चैतदिन्दुगभस्तिसंभारभासुरं हंसतूलदुकूलशयनम् । एष च को नु शीतरश्मिकिरणरजतरज्जुदोलापरिभ्रष्टमूर्छित इवाप्सरोगणः स्वैरसुप्तः सुन्दरीजनः । का चेयं देवीवारविन्दहस्ता शारदशशाङ्कमण्डलं पर्यङ्कतलमेतदमलदुकूलोत्तरच्छदमधिशेते । न तावदेषा देवयोषा । यतो मन्दमन्दमिन्दुकिरणैः संवाह्यमाना कमलिनीव निद्राति । भग्नवृन्तच्युतरसबिन्दुशबलितं पाकपाण्डुचूतफलमिवोद्भिन्नस्वेदलेखमालक्ष्यते गण्डस्थलम् । अभिनवयौवनविदाहनिर्भरोष्मणि कुचतटे वैवर्ण्यमुपैति वर्णकः । वाससी च परिभोगानुरूपं धूसरिमाणमादर्शयतः । तदेषा मानुष्येव दिष्ट्या चानुच्छिष्टयौवना । यतः सौकुमार्यगताः सन्तोपि संहता इवावयवाः । प्रस्निग्धतमापि पाण्डुतानुविद्धेव देहच्छविः । अदन्तपीडाभिज्ञतया नातिविशदरागोद्भेदो मुखे विद्रुमद्युतिरधरमणिः । अनत्यापूर्णमारक्तमूलं चम्पककुड्मलदलकठोरं कपोलतलम् । अनङ्गबाणपातशंकामुक्ततया च विश्रब्धमधुरं सुप्यते । न चैतद्वक्षःस्थलं निर्दयविमर्दविस्तारितमुखस्तनयुगमुकुलम् । अस्ति च ममानतिक्रान्तशिष्टमर्यादचेतसोस्यामासक्तिः । आसक्त्यनुरूपं पुनराश्लिष्टा यदि स्पष्टमाक्रन्दितेनैव निद्रां मोक्ष्यति । अथाहं न शक्ष्यामि चानुपश्लिष्य शयितुम् । अतो यद्भावि तद्भवतु । भाग्यमत्र परीक्षिष्य इति स्पृष्टास्पृष्टमेव किमप्याविद्धरागसाध्वसं लक्ष्यसुप्तः स्थितोस्मि । सापि किमप्युत्कम्पिता रोमोद्भेदवता वामपार्श्वेन सुखायमानेन मन्दमन्दजृम्भिकारम्भमन्थराङ्गी त्वङ्गदग्रपक्ष्मणोश्चक्षुषोरलसतान्ततारकेणानतिपक्वनि-

14. 2. पल्लव° W.—इदं W.—14. 3. °रश्मिरश्मि° C. W.—14. 4. एव A.—14. 5. मण्डलामलदुकूल° W. मण्डलं मल° (*sic*) B. C our reading corrected into that of W.—14. 8. °रेखं C. W.—गण्डस्थलमालक्ष्यते C. W.—14. 12. दन्तपीडानभिज्ञतया C. W.—14. 14. शङ्कामुक्तं B. °मुक्ताशङ्क C. W.—14. 17. C omits यदि.—आर्तरवेणैव C. W.—14. 18. C omits न.—14. 22. अतिपक्व° W.—

द्राकषायितापाङ्गपरभागेण युगलेनेषदुन्मिषन्ती त्रासविस्मयहर्षरागशङ्काविलासविभ्रमव्यवहितानि व्रीडान्तराणि कानि कान्यपि कामेनाद्भुतानुभावेनावस्थान्तराणि कार्यमाणा परिजनप्रबोधनोद्यतां गिरमावेगपरवशं हृदयमङ्गानि च साध्वसायाससंबध्यमानस्वेदपुलकानि कथंकथमपि निगृह्य सस्पृहेण मधुरकूणितत्रिभागेण मन्दमन्दप्रचारितेन चक्षुषा मदङ्गानि निर्वर्ण्य दूरोत्सर्पितपूर्वकायापि तस्मिन्नेव शयने सचकितमशयिष्ट । अजनिष्ट च मे रागाविष्टचेतसोपि किमपि निद्रा । पुनरननुकूलस्पर्शदुःखायमानगात्रः प्राबुध्ये । प्रबुद्धस्य च मे सैवाटवी तदेव तरुतलं स एव पत्रास्तरोभूत् । विभावरी च व्यभासीत् । अभूच्च मे मनसि । किमयं स्वप्नः किं विप्रलम्भः । किं वेयमासुरी दैवी वा कापि माया । यद्भावि तद्भवतु । नाहमिदं तत्त्वतोनवबुध्य मोक्ष्यामि भूमिशयनम् । यावदायुरत्रत्यायै देवतायै प्रतिशयितोस्मीति निश्चितमतिरतिष्ठम् ।

अथाविर्भूय कापि रविकराभितप्तकुवलयदामतान्ताङ्गयष्टिः क्लिष्टनिवसनोत्तरीया निरलक्तकरूक्षपाटलेन निःश्वासोष्मजर्जरितत्विषा दन्तच्छदेन वमन्तीव कपिलधूमधूम्रं विरहानलमनवरतसलिलधाराविसर्जनाद्रुधिरशेषमिव लोहिततरं द्वितयमक्ष्णोरुद्वहन्ती कुलचारित्रबन्धनपाशविभ्रमेणैकवेणीभूतेन केशकलापेन नीलांशुकचीरचूडिकापरिवृता पतिव्रतापताकेव संचरन्ती क्षामक्षामापि देवतानुभावादनतिक्षीणवर्णावकाशा सीमन्तिनी प्रणिपतन्तं मां प्रहर्षोत्कम्पितेन भुजलताद्वयेनोत्थाप्य पुत्रवत्परिष्वज्य शिरस्युपाघ्राय वात्सल्यमिव स्तनमुखेन स्तन्यच्छलात्प्रक्षरन्ती शिशिरेणाश्रुणा निरुद्धकण्ठी स्नेह-

15. 1. कषायदर्शितरागोपाङ्गपरभागेन A. कषायितं (*sic*) गपरभागेन B.—15. 2. C omits विलास.—15. 3. कामावेग° C. W.—15. 7. W omits च.—15. 9. सैव मे W. B omits मे.—15. 10. विप्रलम्भो वा W.—15. 11. W omits वा.—15. 12. °शय्यां C. W.—15. 13. प्रतिशयिष्यामीति C. W.—15. 18. नीलांशुकराचितचीरचूलिका°. C. नीलांशुकराचितचीरचूलिका° W.—15. 21. स्तनयुगेन C. स्तनयुगलेन W.—

गर्भं व्याहार्षीत् । वत्स यद्वः कथितवती मगधराजमहिषी वसुमती मम हस्ते बालमर्थपालं परिदाय कथां कांचिदात्मभर्तृपुत्रसखीजनानुविद्धां राजराजप्रवर्तितां कृत्वान्तर्धानमगादात्मजा मणिभद्रस्येति साहमस्मि वो जननी । पितुर्वो धर्मपालसूनोः सुमित्रानुजस्य कामपालस्य पादपद्ममूलान्निष्कारणकोपकलुषिता प्रोष्यानुशयविधुरा स्वप्ने केनापि रक्षोरूपेणोपेत्य शप्तास्मि । चण्डिकायां त्वयि वर्षमात्रं वसामि प्रवासदुःखायेति ब्रुवतैवाहमाविष्टा प्राबुध्ये । गतं च तद्वर्षं वर्षसहस्रदीर्घम् । अतीतायां तु यामिन्यां देवदेवस्य त्र्यम्बकस्य श्रावस्त्यामुत्सवसमाजमनुभूय बन्धुजनं च स्थानस्थानेभ्यः संपतितमभिसमीक्ष्य मुक्तशापा पत्युः पार्श्वमुपसरिष्यामीति प्रस्थिताया मेव मयि त्वमभ्येत्य प्रपन्नोस्मि शरणमिहत्यां देवतामिति प्रसुप्तोसि । एवं शापदुःखाविष्टया तु मया तदा न तत्त्वतः परिच्छिन्नो भवान् । अपि तु शरणागतमटव्यामविरलप्रमादायामयुक्तं परित्यज्य गन्तुमिति मया त्वमपि स्वपन्नेवासि नीतः । प्रत्यासन्ने च तस्मिन्देवगृहे पुनरचिन्तयम् । कथमिव तरुणेनानेन सह समाजं गमिष्यामीति । अथ राज्ञः श्रावस्तीश्वरस्य यथार्थनाम्नो धर्मवर्धनस्य कन्यां नवमालिकां घर्मकालसुभगे कन्यापुरविमानहर्म्यतले विशालकोमलशय्यातलमधिशयानां यदृच्छयोपलभ्य दिष्ट्येयं प्रसुप्ता परिजनश्च गाढनिद्रः शेतामयमत्र मुहूर्तमात्रं ब्राह्मणकुमारो यावत्कृतकृत्या निवर्तयेति त्वममुत्र शाययित्वा तमुद्देशमगमम् । दृष्ट्वोत्सवश्रियं निर्विश्य च स्वजनदर्शनसुखमभिवाद्य च त्रिभुवनेश्वरं महेश्वरमा-

---

16. 1. इ्ये B. नदि वः C. W.—16. 2. निधाय C. W.—कथां च C. W. कथांचि for कथां कांचित् B.—16. 5. W omits पद्म.—16. 11. प्रतिपन्नः W.—16. 12. एव A.—C W omit तु.—तदा मया C.—16. 13. A omits तु.—अविरलप्रमादायामस्यां महाटव्यां C. W.—16. 14. C omits मया त्वमपि.—16. 15. अथ कथमिव A. इह for इव C. W.—16. 17. विशालकोमलं B. विशालकोमलतलं शय्यातलं C. W. In C the first तल is smeared over.—16. 18. सुप्ता C. W.—गाढसुप्तः A.—16. 20. निवर्तयेयम् A.—अत्र A. तत्र C. W.—दृष्ट्वा च C. W.—16. 21. W omits महेश्वरं.—

त्मालीकप्रत्याकलनोपारूढसाध्वसं च नमस्कृत्य भक्तिप्रणतहृदया भगवतीमम्बिकां तया गिरिदुहित्रा देव्या सस्मितमयि भद्रे मा भैषीर्भवेदानीं भर्तृपार्श्वगामिनी गतस्ते शाप इत्यनुगृहीता सद्य एव प्रत्यापन्नमहिमा प्रतिनिवृत्य दृष्ट्वैव त्वां यथावदभ्यजानाम् । कथं मत्सुत एवायं वत्सस्यार्थपालस्य प्राणभूतः सखा प्रमतिरिति । पापया मयाज्ञानादस्मिन्नौदासीन्यमाचरितम् । अपि चायमस्यामासक्तभावः । कन्या चैनं कामयते युवानम् । उभौ चेमौ लक्षसुप्तौ त्रपया साध्वसेन वान्योन्यस्यात्मानं न विवृण्वाते । गन्तव्यं च मया । कामाघ्रातयाप्यनया कन्यया न गुह्यरक्षणाय समाभाषितः सर्वसखीजनः परिजनो वा । नयामि तावत्कुमारम् । पुनरिममर्थलब्धलक्ष्यैर्यथोपपन्नैरुपायैः साधयिष्यामीति मत्प्रभावस्वापितं भवन्तमेतदेव पत्रशयनं तदेव प्रत्यनैषम् । एवमिदं वृत्तम् । एषा चाहं पितुस्ते पादमूलमुपसर्पयामिति प्राञ्जलिं मां भूयो भूयः परिष्वज्य शिरस्युपाघ्राय कपोलयोश्चुम्बित्वा स्नेहविह्वला गतासीत् ।

अहं च पञ्चबाणवश्यः श्रावस्तीमभ्यवर्तिषि । मार्गे च महति निगमे नैगमानां ताम्रचूडयुद्धकोलाहलो महानासीत् । अहं च तत्र संनिहितः किंचिदस्मेषि । संनिधिनिषण्णस्तु मे वृद्धविटः कोपि ब्राह्मणः शनैः स्मितहेतुमपृच्छत् । अब्रवं च । कथमिह नालिकेरजातेः प्राच्यवाटकुक्कुटस्य प्रतीच्यवाटपुरुषैरसमीक्ष्य बलाकाजातिस्ताम्रचूडो बलप्रमाणाधिकस्यैवं प्रतिविसृष्ट इति । सोपि तज्ज्ञः किमज्ञैरेभिर्व्युत्पादितैस्तव तूष्णीमास्स्वेत्युपहस्तिकायास्ताम्बूलं कर्पूरसहितमुद्धृत्य मह्यं दत्त्वा चित्राः कथाः कथयन्क्षणमतिष्ठत् । प्रायुध्यत चातिसंरब्धमनुप्रहार-

---

17. 1. °हृदयां B. C. W.—17. 3. B has a gap here from गतस्ते शापः to शिरस्युपाघ्राय l. 13. —17. 6. अस्मिन्नज्ञानात् W.—17. 8. अन्योन्यं W.—17. 9. कन्ययानुगृह्य A.—17. 10. इयं A.—लब्धलक्षो A. लब्धलक्षणो W.—17. 12. C W omit तदेव.—वृत्तं C. W.—17. 13. प्रत्यपसर्पयं C. W.—17. 14. °विक्लवा W.—17. 15. A here and elsewhere, श्रावंतीं.—17. 18. शनकैः W C omit the word.—नारिकेरक C. नारिकेल W.—17. 21. A writes टपदसिकायाः—

प्रवृत्तस्वपक्षमुक्तकण्ठीरवरवं विहंगमद्वयम् । जितश्चासौ प्रतीच्यवाटकुक्कुटः । सोपि विटब्राह्मणः स्ववाटकुक्कुटविजयहृष्टो मयि वयोविरुद्धं सख्यमुपेत्य तदहः स्वगृह एव स्नानभोजनादि कारयित्वोत्तरेद्युः श्रावस्तीं प्रतियान्तमनुगम्य स्मर्तव्योस्मि सत्यर्थ इति मित्रवद्विसृज्य प्रत्ययासीत् ।

अहं च गत्वा श्रावस्तीमध्वश्रान्तो बाह्योद्याने लतामण्डपे शयितोस्मि । हंसरवप्रतिबोधितश्चोत्थाय कामपि क्वणन्नूपुरमुखराभ्यां चरणाभ्यां मदन्तिकमुपसरन्तीं युवतीमद्राक्षम् । सा त्वागत्य स्वहस्तवर्तिनि चित्रपटे लिखितं मत्सदृशं किमपि पुंरूपं मां च पर्यायेण निर्वर्णयन्ती सविस्मयं सतर्कं च क्षणमवातिष्ठत । मयापि चित्रपटे तत्र मत्सादृश्यं पश्यता तस्याश्च तद्दृष्टिचेष्टितमनाकस्मिकं मन्यमानेन ननु सर्वसाधारणोयं रमणीयः पुण्यारामभूमिभागः किमिति चिरं स्थित्वा क्लेशोनुभूयते ननूपवेष्टव्यमित्यभिहिता सा सस्मितमनुगृहीतास्मीति न्यषीदत् । संकथा च देशवार्त्तानुबद्धा काचनावयोरभूत् । कथासंश्रिता च सा देशातिथिरसि दृश्यन्तेध्वश्रान्तानीव गात्राणि यदि न दोषो मद्गृहेद्य विश्रमितुमनुग्रहः क्रियतामित्यशंसत् । अहं च मुग्धे नैष दोषो गुण एवेति तदनुमार्गगामी तद्गृहगतो राजार्हेण स्नानभोजनादिनोपचरितः सुखनिषण्णो रहसि पर्यपृच्छ्ये । महाभाग दिनान्तराणि भ्रमता काच्चिदस्ति किंचिदद्भुतं भवतोपलब्धमिति । ममाभवन्मनसि । महदिदमाशास्पदम् । एषा खलु निखिलपरिजनसंबाधसंलक्षितायाः सख्येव राजदारिकायाः । चित्रपटे चास्मिन्नास्ति तदुपरिचि-

18. 1. °स्वरक्षं प्रवृत्त° A. अनुरहारप्रवृत्तकण्ठीरवरवं B, with a mark of something omitted.—18. 2. विटः W.—18. 3. तदहरेव स्वगृहे.—18. 4. प्रयान्तम् W.—18. 9. रूपं A. कमपि पुरुषं C. W.—18. 10. सवितर्कं B. सवितर्कं सहर्षं C. W.—18. 11. तत्र चित्रपटे C. W.—18. 12. A omits रमणीयः.—18. 14. °अनुविद्धा B. W.—18. 15. दृश्यन्ते च ते C. W.—18. 17. अहं चापि W.—18. 19. सुखं B. W.—18. 21. °संबाधलक्षितासख्येव A. संवाभस (*sic*) लक्षितास (*sic*) सख्येव B. W omits एव.—

रचितसितवितानं हर्म्यतलं तद्गतं च प्रकामविस्तीर्णं शारदभ्रपटलपाण्डुरं शयनं तदधिशायिनी च निद्रालीढलोचना ममैवेयं प्रतिकृतिः। अतो नूनमनङ्गेन सापि राजकन्या तावतीं भूमिमारोपिता यस्यामसह्यकामज्वरोन्माथिता सखीनिर्बन्धपृष्टविक्रियानिमित्ता चातुर्यादेतद्रूपनिर्माणेनैव समर्थमुत्तरं दत्तवती। रूपसंवादाच्च संशयानयानया पृच्छ्ये भिन्दान्यस्याः संशयं यथानुभवकथनेनेति जातनिश्चयोऽब्रवम्। भद्रे देहि चित्रपटमिति। सा त्वर्पितवती मद्धस्ते। पुनस्तमादाय तामपि व्याजसुप्तामुल्लसन्मदनरागविह्वलां वल्लभामेकत्रैवालिख्य काचिदेवंभूता युवतिरीदृशस्य यूनः पार्श्वशायिन्यरण्यान्यां प्रसुप्तेन मयोपलब्धा। न किलैष स्वप्न इत्यालपं च। हृष्टया तु तया विस्तरतः पृष्टः सर्वमेव वृत्तान्तमकथयम्। असौ च सख्या मन्निमित्तान्यवस्थान्तराण्यवर्णयत्। तदाकर्ण्य च तव यदि सख्या मदनुग्रहोन्मुखं मनो गमय कानिचिदहानि कमपि कन्यापुरे निराशङ्कनिवासकारणमुपायमारचय्यागमिष्यामीति कथंचिदेनामुपगमय्य गत्वा खर्वटं वृद्धविटेन समगंसि। स च ससंभ्रमं विश्रमय्य तथैव स्नानभोजनादि कारयित्वा रहस्यपृच्छत्। आर्य कस्य हेतोरचिरेणैव प्रत्यागतोऽसि। अहं पुनः प्रत्यवादिषमेनम्। स्थान एवार्येण पृष्टः। श्रूयताम्। अस्ति श्रावस्ती नाम नगरी। तस्याः पतिरपर इव धर्मपुत्रो धर्मवर्धनो नाम राजा। तस्य दुहिता प्रत्यादेश इव श्रियः प्रागा इव कुसुमधन्वनः सौकुमार्यविडम्बितनवमालिका नवमालिका नाम कन्या। सा मया समापत्तिदृष्टा कामनाराचपङ्क्तिमिव कटाक्षमालां मम मर्मणि व्यकिरत्। तच्छल्योद्धरणक्षमश्च धन्वन्तरिसदृशोऽपि त्वदृते नेतरोऽस्ति वैद्य इति प्रत्यागतोऽस्मि।

---

19. 3. यस्मात् A.—19. 4. °उन्माथिता सती C. W.—चातुर्येण W.—19. 5. संशयादनया W.—19. 6. भिनिदानि B. भिन्दामि C. भिनद्मि W.—19. 8. तत्रैव C. W. —अभिलिख्य W.—19. 9. पुनः for यूनः A. W.—19. 10. हृष्टयानया (omitting तु) A.—19. 12. यदि तव W.–सख्यामनुग्रहोन्मुखं A —19. 13. निःशङ्कं A.—19. 16. अचिरात् W.—19. 17. W omits अहं पुनः.—अस्मि पृष्टः W.—19. 21. कन्यका W.—19. 22. व्यवाकिरत् C.—

तत्प्रसीद कंचिदुपायमाश्रयितुमर्हसि । अयमहं परिवर्तितस्त्रीवेषः कन्या नाम ते भवेयम् । अनुगतश्च मया त्वमुपगतो धर्मासनगतं धर्मवर्धनमेवं वक्ष्यसि । ममेयमेकैव दुहिता जाता । जातमात्रायां त्वस्यां जनन्यस्याः संस्थिता । माता च पिता च भूत्वाहमेव व्यवर्धयम् । एतदर्थमेव विद्यामयं शुल्कमर्जितुं गतोभूदवन्तिनगरीमुज्जयिनीमस्मद्वैवाह्यकुलजः कोपि विप्रदारकः । तस्मै चेयमनुमता न दातुमितरस्मै योग्या । तरुणीभूता चेयम् । स च विलम्बते । ततस्तमानीय पाणिमस्या ग्राहयित्वा तस्मिन्न्यस्तभारः संन्यसिष्ये । दुरभिरक्षतया तु मुक्तशैशवानां दुहितॄणां विशेषतोमातृकाणामिह देवं मातृपितृस्थानीयं प्रजानामापन्नशरणमागतोस्मि । यदि वृद्धं ब्राह्मणमधीतिनमगतिं च मामनुग्राह्यपक्षे गणयत्यादिराजचरितधुर्यो देवः सैषा भवद्भुजच्छायामखण्डितचारित्रा तावदध्यास्तां यावदस्याः पाणिग्राहकमानयेयमिति । स एवमुक्तो नियतमभिमनायमानः स्वदुहितृसंनिधौ मामावासयिष्यति । गतस्तु भवानागामिनि मासि फाल्गुने फाल्गुनीपूत्तरासु भाविनि राजान्तःपुरजनस्य तीर्थयात्रोत्सवे तीर्थस्थानात्प्राच्यां दिशि गोरुतार्धमन्तरमतीत्य वानीरवलयमध्यवर्तिनि कार्तिकेयगृहे करतलगतेन शुक्लांशुकयुगलेन स्थास्यसि । स खल्वहमनभिशङ्कस्तावन्तं समयमभिविहृत्य राजपुत्र्या सह भूयस्तस्मिन्नुत्सवे गङ्गाम्भसि विहरन्विहारव्याकुले कन्यकासमाजे मग्नोपप्लुतस्त्वदभ्याश एवोन्मङ्क्ष्यामि । पुनस्त्वदुपहृते च वाससी परिधायापनीतदारिकावेषो जामाता नाम भूत्वा त्वामेवानुगच्छेयम् । नृपा-

---

20. 1. किंचित् A.—आरचयितुं C. आचरितुं W.—W omits अर्हसि.—20. 2. ते कन्या नाम W.—20. 3. C W omit जाता. B has a gap here.—20. 4. ममेय माता पिता च भूत्वा (*sic*).—20. 5. एतदर्थं च A.—20. 7. दातुमितरस्मै न योग्या W.—विलम्बितः W.—20. 9. दुरारक्षतया C.—विशेषतश्चामातृकाणां W.—20. 10. आपन्नः A. आपन्नानां C. W.—20. 12. भुजतरु B. W. भुजद्रुम C. छाया- या B. W.—20. 15. C omits फाल्गुने.—तीर्थयात्रोत्सवो भविष्यति W.—20. 16. गोरुतान्तरं B. W. C has our reading corrected into that of B W.—20. 18. कालं W.—20. 20. C W omit च.—

त्मजा तु मामितस्ततोऽन्विष्यानासादयन्ती तया विना न भोक्ष्य इति रुदितवत्यवस्थास्यते । तन्मूले च महति कोलाहले क्रन्दत्सु परिजनेषु रुदत्स्ववरोधजनेषु शोचत्सु पौरजनपदेषु किंकर्तव्यतामूढे सामात्ये पार्थिवे त्वमास्थानीमेत्य मां स्थापयित्वा वक्ष्यसि । देव स एष मे जामाता तवार्हति श्रीभुजाराधनम् । अधीती चतुर्ष्वाम्नायेषु गृहीती षट्स्वङ्गेष्वान्वीक्षिकीविचक्षणश्चतुःषष्टिकलागमप्रयोगचतुरो विशेषेण गजरथतुरगतन्त्रविदिष्वसनास्त्रकर्मणि गदायुद्धे च निरुपमः पुराणेतिहासकुशलः कर्ता काव्यनाटकाख्यायिकानां वेत्ता सोपनिषदोऽर्थशास्त्रस्य निर्मत्सरो गुणेषु विश्रम्भी सुहृत्सु शक्यः संविभागशीलः श्रुतधरो गतस्मयश्च । नास्य दोषमणीयांसमप्युपलभे । न च गुणेष्वविद्यमानम् । तन्मादृशस्य ब्राह्मणमात्रस्य न लभ्य एष संबन्धी । दुहितरमस्मै समर्प्य वार्धकोचितमन्त्यमाश्रमं संक्रमेयं यदि देवः साधु मन्यत इति । स इदमाकर्ण्य वैवर्ण्याक्रान्तवक्त्रः परमुपेतो वैलक्ष्यमारप्स्यतेनुनेतुमनित्यतादिसंकीर्तनेनात्रभवन्तं मन्त्रिभिः सह । त्वं तु तेषामदत्तश्रोत्रो मुक्तकण्ठं विरुद्य बाष्पकुण्ठकण्ठः काष्ठान्याहृत्याग्निं संधुक्ष्य राजद्वार एव चिताधिरोहणायोपक्रमिष्यसे । स तावत्तव पादयोर्निपत्य सामात्यो नरपतिरनूनैरर्थैरुपसंहृत्य दुहितरं मे दत्त्वा मद्योग्यतासमाराधितः समस्तमेव राज्यभारं मयि समर्पयिष्यते । सोयमभ्युपायोनुष्ठेयो यदि तुभ्यं रोचत इति । सोतिपटुर्विटग्रामणीरसकृदभ्यस्तकपटप्रपञ्चः पाञ्चालशर्मा यथोक्तमभ्यधिकं निपुणमुपक्रान्तवान् । आसीच्चात्मसमीहितानामहीनफलसिद्धिः । अन्वभवं च मधुकर इव नवमालिकामा-

---

21. 2. रुदन्त्येव W.—21. 3. अवरोधनेषु B. अवरोधेषु C. सखीजनेषु W.—21. 7. A omits असन.—21. 12. संक्रामेयं A.—21. 13. A omits वैवर्ण्य.—21. 15. रुदित्वा चिरस्य C. W.—21. 16. राजमन्दिरद्वारे W.—C W omit एव.—21. 17. उपक्रमिऽयस (*sic*) A. उपक्रीमष्येसस्य (*sic*) पादयोः B.—अभिमतैरर्थैस्त्वामुपच्छन्द्य W. उपहृत्य C.—21. 20. सोतिश्चतिदुः (*sic*)B. सोपि पटुः W.—विटानामग्रणीः W.—21. 22. अहीनकाल A. अहीनकाला B.

र्द्रसुमनसम् । अस्य राज्ञः सिंहवर्मणः साहाय्यदानं सुहृत्संकेतभूमिगमनं द्वयमप्यवेक्ष्य सर्वबलसंदोहेन चम्पामिमामुपगतो दैवाद्देवदर्शनोत्सवसुखमनुभवामीति । श्रुत्वैतत्प्रमितिचरितं स्मितमुकुलितमुखनलिनो विलासप्रायमूर्जितं मृदुप्रायं चेष्टितमिष्ट एष मार्गः प्रज्ञावतामथेदानीमत्रभवान्प्रविशत्विति मित्रगुप्तमैक्षत क्षितीशपुत्रः ।

इति श्रीदण्डिनः कृतौ दशकुमारचरिते प्रमितिचरितं नाम पञ्चम उच्छ्वासः ॥

स चाचचक्षे । देव सोहमपि सुहृत्साधारणभ्रमणकारणः सुह्मेषु दामलिप्ताह्वयस्य नगरस्य बाह्योद्याने महान्तमुत्सवसमाजमालोकयम् । तत्र क्वचिदतिमुक्तलतामण्डपे कमपि वीणावादेनात्मानं विनोदयन्तं युवानमद्राक्षम् । अप्राक्षं च । भद्र को नामायमुत्सवः किमर्थं वा समारब्धः केन वा निमित्तेन पुनरुत्सवश्रियमनादृत्यैकान्ते भवानुत्कण्ठित इव परिवादिनीद्वितीयस्तिष्ठतीति । सोभ्यधत्त । सौम्य सुह्मपतिस्तुङ्गधन्वा नामानपत्यः प्रार्थितवानमुष्मिन्नायतने विस्मृत्य विन्ध्यवासरागं वसन्त्या विन्ध्यवासिन्याः पादमूलादपत्यद्वयम् । अनया च किलास्मै प्रतिशयिताय स्वप्ने समादिष्टम् । तव चैकः पुत्रः समुत्पत्स्यते । जनिष्यते चैका दुहिता । स तु पुत्रस्तस्याः पाणिग्राहकमनुजीविष्यति । सा च सप्तमाद्वर्षादारभ्या परिणयनात्प्रतिमासं कृत्तिकासु कन्दुकनृत्येन गुणवद्भर्तृलाभाय मां समाराधयतु । यं च साभिलषेदमुष्मै देया । स चायमुत्सवः कन्दुकनामास्त्विति । ततोल्पीयसा कालेन राज्ञः प्रियमहिषी मेदिनी नामैकं पुत्रमसूत । समुत्पन्ना चैका दुहिता । साद्य कन्या कन्दुकावती नाम सोमापीडां देवीं कन्दुकविहारेणाराधयितुमागमिष्यति । तस्यास्तु सखी धात्रेयिका चन्द्रसेना नाम माप्रियासीत् । सा चैषु दिवसेषु राजपुत्रेण भीमधन्वना बलवदवरुद्धा । तदहमुत्कण्ठितो मन्मथशरशल्यदुःखाविष्टचेताः कलेन वीणारवेणात्मानं किंचिदाश्वासयन्विविक्तमध्यास इति ।

अस्मिन्नेव क्षणे किमपि मणिनूपुरक्वणितमुपातिष्ठत । आगता च काचिदङ्गना । दृष्ट्वैव स एनामुत्फुल्लदृष्टिरुत्थायोपगूह्य गाढमुपगूढकण्ठश्च तया तत्रैवोपाविशत् । अशंसच्च । सैषा मम प्राणसमा यद्विरहो

23. 5. C W omit पुनर्.—23. 7. विस्मृत° W. So also C, but corrected to our reading.—23. 9. B omits च. उत्पत्स्यते तवैकः पुत्रः W.—23. 10. C W omit पुत्रः.—23. 11. सा तु W.—23. 12. यं चाभिलषेत्सा W.—23. 13. W omits अयं.—कन्दुकोत्सवो नाम B. W.—23. 15. आराधयिष्यति C. W.—23. 16. मम प्रिया C. W.—23. 18. दुःखोद्विग्न W.—23. 20. W omits मणि.—उपातिष्ठत् A.—23. 21. उत्थायोपगूढस्तया W.—23. 22. मे C. W.—

दहन इव दहति माम् । इदं मे जीवितमपहरता राजपुत्रेण मृत्युनेव निरुष्मतां नीतोहम् । न च शक्यामि राजसूनुरित्यमुष्मिन्पापमाचरितुम् । अतोनयात्मानं सुदृढं कारयित्वा त्यक्ष्यामि निष्प्रतिक्रियान्प्राणानिति । सा तु पर्यश्रुमुखी समभ्यधात् । मा स्म नाथ मत्कृतेध्यवस्यः साहसम् । यस्त्वमुत्तमात्सार्थवाहादर्थदासादुत्पद्य कोशदास इति गुरुभिरभिहितनामधेयः पुनर्मदत्यासङ्गाद्वेशदास इति द्विषद्भिः प्रख्यापितोसि तस्मिंस्त्वय्युपरते यद्यहं जीवेयं नृशंसो वेश इति समर्थयेयं लोकवादम् । अतोद्यैव नय मामीप्सितं देशमिति । स तु मामभ्यधत्त । भद्र भवद्दृष्टेषु राष्ट्रेषु कतमत्समृद्धं संपन्नशस्यं सत्पुरुषभूयिष्ठं चेति । तमहमीषद्विहस्याब्रवम् । भद्र विस्तीर्णेयमर्णवाम्बरा । न पर्यन्तोस्ति स्थानस्थानेषु रम्याणां जनपदानाम् । अपि तु न चेदिह युवयोः सुखनिवासकारणं कमप्युपायमुत्पादयितुं शक्नुयां ततोहमेव भवेयमध्वदर्शीति । तावतोदैरत रणितानि मणिनूपुराणाम् । अथासौ जातसंभ्रमा प्रविवेयं भर्तृदारिका कन्दुकावती कन्दुकक्रीडितेन देवीं विन्ध्यवासिनीमाराधयितुम् । अनिषिद्धदर्शना चेयमस्मिन्कन्दुकोत्सवे । सफलमस्तु युष्मच्चक्षुः । आगच्छतं द्रष्टुम् । अहमस्याः सकाशवर्तिनी भवेयमित्ययासीत् । तामन्वयाव चावाम् । महति रत्नरङ्गपीठे स्थितां प्रथमं ताम्रोष्ठीमपश्यम् । अतिष्ठच्च सा सद्य एव मम हृदये । न मयान्येन वान्तराले दृष्टा । चित्रीयाविष्टचित्तश्चाचिन्तयम् । किमियं लक्ष्मीः । नहि । तस्याः किल हस्ते कमलम् । अस्यास्तु हस्त एव कमलम् । भुक्तपूर्वा च सा पुरातनेन पुंसा पूर्वराजैश्च । अस्याः पुनरनवद्यमयातयामं च यौवनम् । इति चिन्तयत्येव मयि सानवद्यसर्वगात्री व्यत्यस्तहस्त-

---

24. 1. इदं च जीवितं मे C. इदं च मे जीवितं W.—मृत्युरेव B.—24. 2. A drops a line here.—24. 5. कोसदास A.—24. 11. स्थाने स्थाने W.—24. 17. W omits इति.—24. 19. मद्धृदये B. मे C. W.—च C. W. (corrected in C.)—24. 20. नहि नहि B. W.—24. 21. किस्या (*sic*) B. विन्यस्तकमलं W.—24. 22. अस्यां W.—24. 23. हस्तावे C.

पल्लवाग्रस्पृष्टभूमिरालोलनीलकुटिलालका ससंभ्रमं भगवतीं भवानीमभिवन्द्य कन्दुकममन्दरागरूषिताक्षमनङ्गमिवालम्बत लीलाशिथिलं च भूमौ मुक्तवती । मन्दोत्थितं च किंचित्कुञ्चिताङ्गुष्ठेन प्रसृतकोमलाङ्गुलिना पाणिपल्लवेन समाहत्य हस्तपृष्ठेन चोन्नीय चटुलदृष्टिलाञ्छितं स्तबकमिव भ्रमरमालानुविद्धमवपतन्तमाकाश एवाग्रहीत् । अमुञ्चच्च मध्यविलम्बितलये द्रुतलये च । मृद्वमृदु च प्रहरन्ती तत्क्षणं चूर्णपदमदर्शयत् । प्रशान्तं च तं निर्दयप्रहारैरुदपातयत् । विपर्ययेण च प्राशमयत् । पक्षमृज्वागतं च वामदक्षिणाभ्यां कराभ्यां पर्यायेणाभिघ्नती शकुन्तमिवोदस्थापयत् । दूरोत्थितं तु प्रपतन्तमभिहत्य गीतमार्गमारचयत् । प्रतिदिशं च गमयित्वा प्रत्यागमयत् । एवमनेककरणमधुरं विहरन्ती रङ्गगतस्य च रक्तचेतसो जनस्य प्रतिक्षणमुच्चावचाः प्रशंसावाचः प्रतिगृह्णती तत्क्षणारूढविश्रम्भं कोशदासमंसेवलम्ब्य कण्टकितगण्डमुत्फुल्लेक्षणं च मय्यभिमुखीभूय तिष्ठति तत्प्रथमावतीर्णकन्दर्पकारितकटाक्षदृष्टिस्तदनुमार्गविलसितलीलाञ्चितभ्रूलता श्वासानिलवेगान्दोलितैर्दन्तच्छदरश्मिजालैर्लीलापल्लवैरिव मुखकमलपरिमलग्रहणलोलानलिनस्ताडयन्ती मण्डलभ्रमणेषु कन्दुकस्यातिशीघ्रप्रचारितया विशन्तीव मद्दर्शनलज्जया पुष्पमयं पञ्जरं पञ्चबिन्दुप्रसृतेषु पञ्चापि पञ्चबाणबाणान्युगपदिवाभिपतत्त्रासेनावघट्टयन्ती गोमूत्रिकाप्रचारेषु घनदर्शितरागविभ्रमा विद्युल्लतामिव विडम्बयन्ती भूषणमणिरणितदत्तलयसंवादिपादचारमपदेशास्मितप्रभाभिषिक्तबिम्बाधरमवस्रंसितप्रतिसमाहितशिखण्डभारमाघट्टितक्वणितरत्नमेखलागुणमञ्चितोत्थितपृथुनितम्बबिम्बलम्बिचलदंशुकाञ्चलमाकुञ्चितप्रसृतवेल्लितभुजलताभिहतललितकन्दुकमावर्तितबाहुपाशं परिवर्तितत्रिकविलग्नलोल-

25. 1. सविभ्रमं W.—C W omit भवानीं.—25. 6. °विलम्बिते लये B. C.—B omits अमृदु च. मृदु मृदु च C. मृदु मृदु W.—25. 7. A C omit च before प्राशमयत्.—25. 8. °आगते A. C.—25. 9. च for तु C. W.—आहत्य C.W.—25. 16. मंगलभ्रमणेषु A.—25. 17. °प्रचारतया B. W.—25. 21. °गुणंऽप्रपंचितोत्थित (*sic*) C.—25. 23. °बाहुपाशानुविद्धपरिवर्ति° A. So also C, with a correction to our reading.—

कुन्तलमवगलितकर्णपूरकनकपत्त्रप्रतिसमाधानशीघ्रतानतिक्रमितप्रकृतक्रीडमसकृदुत्क्षिप्यमाणहस्तपादबाह्याभ्यन्तरभ्रान्तकन्दुकमवनमनोन्नमनैरन्तर्यनष्टदृष्टमध्ययष्टिकमवपतनोत्पतनविपर्यस्तमुक्ताहारमङ्कुरितघर्मसलिलदूषितकपोलपत्त्रभङ्गशोषणाधिकृतश्रवणपल्लवानिलमागलितस्तनतटांशुकनियमनव्यापृतैकपाणिपल्लवं च निषद्योत्थाय निमील्योन्मील्य स्थित्वा गत्वा चैवातिचित्रं पर्यक्रीडत राजकन्या । अभिहत्य भूतलाकाशयोरपि क्रीडान्तराणि दर्शनीयान्येकेनैवानेकेनेव कन्दुकेनादर्शयत् । चन्द्रसेनादिभिश्च प्रियसखीभिः सह विहृत्य विहृतान्ते चाभिवन्द्य देवीं मन्मनसा सानुरागेण परिजनेन चानुगम्यमाना कुवलयशरमिव कुसुमशरस्य मय्यपाङ्गं समर्पयन्ती सापदेशमसकृदावर्त्यमानवदनचन्द्रमण्डलतया स्वहृदयमिव मत्समीपप्रेषितं प्रतिनिवृत्तं न वेत्यालोकयन्ती सह सखीभिः कुमारीपुरमगमत् ।

अहं चानङ्गविह्वलः स्वमेव वेश्म गत्वा कोशदासेन यत्नवदत्युदारं स्नानभोजनादिकमनुभावितोस्मि । सायं चोपसृत्य चन्द्रसेना रहसि मां प्रणिपत्य पत्युरंसमंसेन प्रणयपेशलमाघट्टयन्त्युपाविशत् । आचष्ट च हृष्टः कोशदासः । भूयासमेवं यावदायुरायताक्षि त्वत्प्रसादस्य पात्रमिति । मया तु सस्मितमभिहितम् । सखे किमेतदाशास्यम् । अस्ति किंचिदञ्जनम् । अनया तदक्तनेत्रया राजसूनुरुपस्थितो वानरीमिवैनां द्रक्ष्यति विरक्तश्चैनां पुनस्त्यक्ष्यतीति । तया तु स्मेरयास्मि कथितः । सोयमार्येणाज्ञाकरो जनोत्यर्थमनुगृहीतः । यदस्मिन्नेव जन्मनि मानुषं वपुरपनीय वानरीकरिष्यते । तदास्तामिदम् । अन्यथा सिद्धं नः समीहितम् । अद्य खलु कन्दु-

---

26. 1. आगलित A.—26. 2. क्रीडनं W.—26. 3. निर्व्यवस्थ for विपर्यस्त W.—26. 5. B C omit च.—26. 7. दर्शनीयान्येकेनैव कंडुकेन A. एकैव (*sic*) कंडुकेन C. एकेनैव वानेकेनैव W.—26. 8. विहृता A.—26. 9. सानुरागेणेव A. W.—W omits च.—26. 11. मत्समीपे W. मत्समीपप्रेषितं C.—26. 13. अनंगविद्धः A.—कोशदासेन सह C.—26. 14. अत्युदार° A.—26 15. प्रणयपेशलया W.—26. 21. मानुष° A.—

कोत्सवे भवन्तमवहसितमनोभवाकारमभिलषन्ती रोषादिव शम्बरद्विषातिमात्रमायास्यते राजपुत्री । सोयमर्थो विदितभावया मया स्वमात्रे तया च तन्मात्रे महिष्या च मनुजेन्द्राय निवेदयिष्यते । विदितार्थस्तु पार्थिवस्त्वया दुहितुः पाणिं ग्राहयिष्यति । ततश्च त्वदनुजीविना राजपुत्रेण भवितव्यम् । एष हि देवतासमादिष्टो विधिः । त्वदायत्ते च राज्ये नालमेष त्वामतिक्रम्य मामवरोद्धुं भीमधन्वा । तत्सहतामयं त्रिचतुराणि दिनानि । इति मामामन्त्र्य प्रियं चोपगूह्य प्रत्ययासीत् । मम कोशदासस्य च तदुक्तानुसारेण बहु विकल्पयतोः कथंचिदक्षीयत क्षपा । क्षपान्ते च कृतयथोचितनियमस्तमेव प्रियादर्शनसुभगमुद्यानोद्देशमुपगतोस्मि । तत्रैव चोपसृत्य राजपुत्रो निरभिमानमनुकूलाभिः संकथाभिर्मामनुवर्तमानो मुहूर्तमास्त । नीत्वा चोपकार्यामात्मसमेन स्नानभोजनशयनादिव्यतिकरेणोपाचरत् । तल्पगतं च स्वप्नानुभूयमानप्रियादर्शनालिङ्गनसुखमायसेन निगडेनातिबलपुरुषैः पीवरभुजदण्डोपरुद्धमबन्धयन्माम् । प्रतिबुद्धं च सहसा समभ्यधात् । अयि दुर्मते श्रुतमालपितं हतायाश्चन्द्रसेनाया जालरन्ध्रनिःसृतं तच्चेष्टावबोधप्रयुक्तयानया कुब्जया । त्वं किलाभिलषितो वराक्या कन्दुकावत्या । तव किलानुजीविना मया स्थेयम् । त्वद्वचः किलानतिक्रमता मया चन्द्रसेना कोशदासाय दास्यते । इत्युक्त्वा पार्श्वचरं पुरुषमेकमालोक्याकथयत् । प्रक्षिपैनं सागर इति । स तु लब्धराज्य इवातिहृष्टो देव यदाज्ञापयसीति यथादिष्टमकरोत् । अहं तु निराम्बलनो भुजाभ्यामितस्ततः स्पन्दमानः किमपि काष्ठं दैवदत्तमुरसोपश्लिष्य तावदप्लोषि यावदपासरद्वासरः शर्वरी च सर्वा । प्रत्युषस्यदृश्यत किमपि वहित्रम् । अमुत्रासन्यवनाः । ते मामुद्धृत्य रामेषुनाम्ने नाविकनायकाय कथितवन्तः । कोप्ययमायस-

27. 1. अपहसित A.—C omits इव.—27. 4. A. B. C. ग्राहयिष्यतीति.—27. 6 एव for एष C. W.—27. 8. मम च W.—27. 10. उपागतोस्मि B. W.—27. 19. A omits एकं.—27. 20 यथाज्ञापयतीति A.—27. 23. A omits किमपि.—

निगडबद्ध एव जले लब्धः पुरुषः। सोयमपि सिक्थेत्सहस्रं द्राक्षाणां क्षणेनैकेनेति। अस्मिन्नेव क्षणेनैकनौकापरिवृतः कोपि मद्गुरभ्यधावत्। अबिभयुर्यवनाः। तावदतिजवा नौकाः श्वान इव वराहमस्मत्पोतं पर्यरुत्सत। प्रावर्तत च संप्रहारः। पराजायिषत यवनाः। तानहमगलीनवसीदतः समाश्वास्यालापिषम्। अपनयत मम निगडबन्धनम्। अयमहमवसादयामि वः सपत्नानिति। अमी तथाकुर्वन्। सर्वांश्च तान्प्रतिभटान्भल्लवर्षिणा भीमटंकृतेन शार्ङ्गेण लवलवीकृताङ्गानकार्षम्। अवप्लुत्य हतविध्वस्तयोधमस्मत्पोतसंसक्तपोतममुत्र नाविकनायकमनभिसरमभिपत्य जीवग्राहमग्रहीषम्। असौ चासीत्स एव भीमधन्वा। तं चाहमवबुध्य जातव्रीडमब्रवम्। तात किं दृष्टानि कृतान्तविलसितानीति। ते तु सांयात्रिका मदीयेनैव शृङ्खलेन तमतिगाढं बद्ध्वा हर्षकिलकिलारवमकुर्वन्मां चापूजयन्।

दुर्वहा तु सा नौरननुकूलवातनुन्ना दूरमभिपत्य किमपि द्वीपान्तरं निबिडमाश्लिष्टवती। तत्र च स्वादु पानीयमेधांसि कन्दमूलफलानि च संजिघृक्षवो गाढपातितशिलावलयमवातराम। तत्र चासीन्महाशैलः। सोहमहो रमणीयोयं पर्वतनितम्बभागः कान्ततरेयं गन्धपाषाणवत्युपत्यका शिशिरमिदमिन्दीवरारविन्दमकरन्दबिन्दुचन्द्रकोत्तरं गोत्रवारि रम्योयमनेकवर्णकुसुममञ्जरीमञ्जुलतरस्तरुवनाभोग इत्यतृप्ततरया दृशा बहु पश्यन्नलक्षिताध्यारूढक्षोणीधरशिखरः शोणीभूतमुत्प्रभाभिः पद्मरागसोपानशिलाभिः किमपि नालीकपरागधूसरं सरः समभ्यगमम्। तत्र स्नातश्च कांश्चिदमृतस्वादून्बिसभङ्गानास्वाद्यांसलग्नकह्लारस्तीरवर्तिना केनापि भीमरूपिणा ब्र-

28. 1. बद्धलब्धो जलेपविद्धः पुरुषः A. B omits पुरुषः.—28. 3. अतिजवान्नौकाः A. अतिजवना B.—28. 4. C W omit च.—पराजयिषत A. C. W. पराजैषत B.—28. 5. अवादिषम् W.—नैगडं बंधनं निगलबंधनं A. B.—28. 8. संसक्तं A.—28. 9. अनभिसरहत्य (*sic*) A.—28. 12. हर्षकालं किलिकिलारवं A.—28. 13. दुर्वरा B. दुर्वारा W.—कमपि द्वीपांतरं A. B. C. कमपि द्वीपं एधांसि च A.—28. 15. C omits फल.—पतित A. W.—28. 16. महारमणीयोयं B.—28. 18. मंजरीभरस्तरु° A.—28. 19. बहुबहु W.—28. 21. तत्र स्नात्वा ततश्च A. B. W omits तत्र.—

ब्रह्मराक्षसेनाभिपत्य कोसि कुतस्त्योसीति निर्भर्त्सयताभ्यधीये । निर्भयेन च मया सोभ्यधीयत । सौम्य सोहमस्मि द्विजन्मा । शत्रुहस्तादर्णवमर्णवाद्यवननावं यवननावश्चित्रग्रावाणमेनं पर्वतप्रवरं गतो यदृच्छयास्मिन्सरसि विश्रान्तः । भद्रं तवेति । सोब्रूत । न चेद्ब्रवीषि प्रश्नानश्नामि त्वामिति । मयोक्तम् । पृच्छ तावत् । भवत्विति । अथावयोरेकयार्ययासीत्संलापः

किं क्रूरं स्त्रीहृदयं किं गृहिणः प्रियहिताय दारगुणाः ।
कः कामः संकल्पः किं दुष्करसाधनं प्रज्ञा ॥

इतीयदुक्त्वा धूमिनीगोमिनीनिम्बवतीनिम्बवत्यः प्रमाणमित्युपदिष्टे मया । सोब्रूत । कथय कीदृश्यस्ता इति । अथोदाहरम् ।

अस्ति त्रिगर्तो नाम जनपदः । तत्रासन्गृहपतयस्त्रयः स्फीतसारधनाः सोदर्या धनकधान्यकधन्यकाख्याः । तेषु जीवत्सु न ववर्ष वर्षाणि द्वादश दशशताक्षः । क्षीणसारं सस्यमोषधयो वन्ध्या न फलवन्तो वनस्पतयः क्लीबा मेघा भिन्नस्रोतसः स्रवन्त्यः पङ्कशेषाणि पल्वलानि निःस्यन्दान्युत्समण्डलानि विरलीभूतं कन्दमूलफलमवहीनाः कथा गलिताः कल्याणोत्सवक्रिया बहुलीभूतानि तस्करकुलान्यन्योन्यमभक्षयन्प्रजाः पर्यलुण्ठन्नितस्ततो बलाकापाण्डुराणि नरशिरःकपालानि पर्यहिण्डन्त शुष्काः काकमण्डल्यः शून्यीभूतानि नगरग्रामखर्वटपुटभेदनादीनि । त एते गृहपतयः सर्वधान्यनिचयमुपयुज्याजाविकं गवलागणं गवां यूथं दासीदासजनमपत्यानि ज्येष्ठमध्यमभार्ये च क्रमेण भक्षयित्वा कनिष्ठभार्या धूमिनी श्वो भक्षणीयेति समकल्पयन् । अथ कनीयान्धन्यकः प्रियां स्वामत्तुमक्षमस्तया सह तस्यामेव निश्यपासरत् । मार्गक्लान्तां चोद्वहन्वनं जगाहे । स्वमांसासृगपनीतक्षुत्पिपासां तां नयन्नन्तरा कमपि निकृत्तपाणिपादकर्णना-

29. 3. एतं पर्वतप्रदेशं B.—29. 9. W omits इति.—29. 10. सोब्रवीत् B.—29. 11. त्रिमर्त्तो A. गर्त्तो B. अस्ति च त्रिगर्त्तो C.—29. 17. पर्यलुठन् A. W.—29. 20. गवलगणं B. C. W.—29. 24. अन्तरे C. W.—अरिनिकृत्त B. कृत्त C.—

सिकमवनिपृष्ठे विचेष्टमानं पुरुषमद्राक्षीत् । तमप्यार्द्राशयः स्कन्धेनोद्वहन्कन्दमूलमृगबहुले गहनोद्देशे यत्नरचितपर्णशालश्चिरमवसत् । अमुं च रोपितव्रणमिङ्गुदीतैलादिभिरामिषेण शाकेनात्मनिर्विशेषं पुपोष । पुष्टं च तमुद्रिक्तधातुमेकदा मृगान्वेषणाय प्रयाते धन्यके सा धूमिनी रिरंसयोपातिष्ठत् । भर्त्सितापि तेन बलात्कारादथारीरमत् । निवृत्तं च पतिमुदकाभ्यर्थिनमुद्धृत्य कूपात्पिब रुजति मे शिरः शिरोरोग इत्युदञ्चनं सरज्जुं पुरश्चिक्षेप । उदञ्चन्तं च तं कूपादधः क्षणात्पृष्ठतो गत्वा प्रणुनोद । तं च विकलं स्कन्धेनोदुह्य देशाद्देशान्तरं परिभ्रमन्ती पतिव्रताप्रतीतिं लेभे बहुविधाश्च पूजाः । पुनरवन्तिराजानुग्रहादतिमहत्या भूत्या तस्मिन्देशे न्यवसत् । अथ पानीयार्थिसार्थजनसमापत्तिदृष्टोद्धृतमवन्तिषु भ्रमन्तमाहारार्थिनं भर्तारमुपलभ्य सा धूमिनी येन मे पतिर्विकलीकृतः स दुरात्मायमिति तस्य साधोश्चित्रवधमज्ञेन राज्ञा समादेशयांचकार । धन्यकस्तु दत्तपश्चाद्बन्धो वध्यभूमिं नीयमानः सशेषत्वादायुषो यो मया विकलीकृतोभिमतो भिक्षुः स चेन्मे पापमाचक्षीत युक्तो मे दण्ड इत्यदीनमधिकृतमभिजगाद । को दोष इत्युपनीय दर्शितेमुष्मिन्स विकलः पर्यश्रुः पादपतितस्तस्य साधोस्तत्सुकृतमसत्याश्च तस्यास्तथाभूतं दुश्चरितमार्यबुद्धिराचचक्षे । कुपितेन च राज्ञा विरूपितमुखी सा दुष्कृतकारिणी श्वभ्यः पाचिका कृता । कृतश्च धन्यकः प्रसादभूमिः । तद्ब्रवीमि स्त्रीहृदयं क्रूरमिति ।

पुनरनुयुक्तो गोमिनीवृत्तान्तमाख्यातवान् । अस्ति द्रविडेषु काञ्ची नाम नगरी । तस्यामनेककोटिसारः श्रेष्ठिपुत्रः शक्तिकुमारो नामासीत् । सोष्टादशवर्षदेशीयश्चिन्तामापेदे । नास्त्यदाराणामननुगुणदाराणां वा सुखं नाम । तत्कथं नु गुणवद्विन्देयं कलत्रमिति । अथ परप्रत्ययाहृतेषु दारेषु यादृच्छिकीं संपत्तिमनभिसमीक्ष्य कार्ता-

30. 2. आरचित A.—30. 6. पिब जलं C. W.—तुदति C.—30. 10. C W omit तस्मिन्देशे.—30. 13. आनीयमानः C.—30. 15. अभिजगाम A.—30. 18. कृत्यश्वभ्यः पाचिका कृता B. कृताश्वभ्यः पाचिका C. W.—30. 23. विधेयं W.—

न्तिको नाम भूत्वा वस्त्रान्तपिनद्धशालिप्रस्थो भुवं बभ्राम । लक्षणज्ञोयमित्यमुष्मै कन्याः कन्यावन्तः प्रदर्शयांबभूवुः । यां कांचिल्लक्षणवतीं सवर्णां कन्यां दृष्ट्वा स किल स्म ब्रवीति । भद्रे शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नमस्मानभ्यवहारयितुमिति । स हसितावधूतो गृहाद्गृहं प्रविश्याभ्रमत् । एकदा तु शिबिषु कावेरीतीरपत्तने सह पितृभ्यामवसितमहर्धिमवशीर्णभवनसारां धात्र्या प्रदर्श्यमानां कांचन विरलभूषणां कुमारीं ददर्श । अस्यां संसक्तचक्षुश्चातर्कयत् । अस्याः खलु कन्यकायाः सर्व एवावयवा न कृशा न स्थूला नातिह्रस्वा नातिदीर्घा न विकटा मृजावन्तश्च । रक्ततलाङ्गुली यवमत्स्यकमलकलशाद्यनेकपुण्यलेखालाञ्छितौ करौ । मग्नगुल्फसंधी मांसलावशिरालौ चाङ्घ्री । जङ्घे चानुपूर्ववृत्ते । पीवरोरुग्रस्ते इव दुरुपलक्ष्ये जानुनी । सकृद्विभक्तश्चतुरस्रः ककुन्दरविभागशोभी रथाङ्गाकारसंस्थितश्च नितम्बभागः । तनुतरमीषन्निम्नं गम्भीरं नाभिमण्डलम् । वलित्रयेण चालंकृतमुदरम् । उरोविभागव्यापिनावुन्मग्नचूचुकौ विशालारम्भशोभिनौ पयोधरौ । धनधान्यपुत्रभूयस्त्वचिह्नलेखालाञ्छिततले स्निग्धोदग्रकोमलनखमणी मृद्वनुपूर्ववृत्तताम्राङ्गुली संनतांसदेशे सौकुमार्यवत्यौ निमग्नपर्वसंधी च बाहुलते । तन्वी कम्बुवृत्तबन्धुरा च कंधरा । वृत्तमध्यविभक्तरागाधरमसंक्षिप्तचारुचिबुकमापूर्णकठिनगण्डमण्डलमसंगतानुवक्रनीलस्निग्धभ्रूलतमनतिप्रौढतिलकुसुमसदृशनासिकमसितधवलरक्तत्रिभागभासुरमधुराधीरसंचारमन्थरायतेक्षणमिन्दुशकलसुन्दरललाटमिन्द्रनीलशिलाकाररम्यालकपङ्क्ति द्विगुणकुण्डलितम्लाननालीकनाललितलम्बश्रवणपाशयुगलमाननकमलम् । अनतिभङ्गुरो बहुलः पर्यन्तेप्यकपिलरुचिरायामवानेकैकनिसर्गसमस्निग्धनीलो गन्धग्राही च

31. 2. अमुष्माय W.—कन्यां A. C.—31. 3. C omits स्म.—31. 5. कावेरीदक्षिणतीरेषु पट्टने W. कावेरीतीरपत्तने B.—31. 7. कांचन विरलभूषणां W.—31. 11. अनुपूर्व° A.—31. 13. कुकुन्दर° W.—31. 15. °शोभितौ A.—31. 17 ऋजु for मृदु C. W.—31. 22. °करालरम्य° A. °कारारम्य° (*sic*) B.—31. 23. °समालंबि A.—

मूर्धजकलापः । सेयमाकृतिर्न व्यभिचरति शीलम् । आसज्जति च मे हृदयमस्याम् । अथ च परीक्ष्यैनामुद्वहेयम् । अविमृश्यकारिणां हि नियतमनेकाः पतन्त्यनुशयपरंपरा इति स्निग्धदृष्टिराचष्ट । भद्रे कच्चिदस्ति कौशलं शालिप्रस्थेनानेन संपन्नमाहारमस्मानभ्यवहारयितुमिति । ततस्तया वृद्धदासी साकूतमालोकिता । तस्य हस्तात्प्रस्थमात्रं धान्यमादाय क्वचिदलिन्दोद्देशे सुसिक्तसंमृष्टे दत्तपादशौचमुपावेशयत् । साथ कन्या तान्गन्धशालीन्मात्रया विशोष्यातपे मुहुर्मुहुः परिवर्त्य स्थिरसमायां भूमौ नालीपृष्ठेन मृदुमृदु घट्टयन्ती तुषैस्तण्डुलान्पृथक्चकार । जगाद च धात्रीम् । मातरेभिस्तुषैरर्थिनो भूषणमृजाक्रियाक्षमैः स्वर्णकाराः । तेभ्य इमान्दत्त्वा लब्धाभिः काकिणीभिः स्थिरतराण्यनत्यार्द्राणि नातिशुष्काणि काष्ठानि मितंपचां स्थालीमुभे शरावे चाहरेति । तथा कृते तया तांस्तण्डुलाननतिनिम्नोत्तानविस्तीर्णकुक्षौ ककुभोलूखले लोहपत्रवेष्टितमुखेन समशरीरेण विभाव्यमानमध्यतानवेन व्यायतेन गुरुणा खादिरेण मुसलेन चतुरललितोत्क्षेपणापक्षेपणायासितभुजमसकृदङ्गुलीभिरुद्धृत्योद्धृत्यावहत्य शूर्पशोधितकणकिंशारुकादींस्तण्डुलानसकृदद्भिः प्रक्षाल्य क्वथितपञ्चगुणे जले दत्तचुल्लीपूजा प्राक्षिपत् । प्रश्लथावयवेषु प्रस्फुरत्सु तण्डुलेषु मुकुलावस्थामतिवर्तमानेषु संक्षिप्यानलमुपहितमुखपिधानया स्थाल्यान्नमण्डमगालयत् । दर्व्या चावघट्य मात्रया परिवर्त्य समपक्वेषु सिक्थेषु तां स्थालीमधोमुखीमवातिष्ठिपत् । इन्धनान्यन्तःसाराण्यम्भसा समभ्युक्ष्य प्रशमिताग्नीनि कृष्णाङ्गारीकृत्य तदर्थिभ्यः प्राहिणोत् । एभिर्लब्धाः काकिणीर्दत्त्वा शाकं घृतं दधि तैलमामलकं चिञ्चाफलं च यथालाभमानयेति । तथानुष्ठिते च तया द्वित्रानुपदंशानुपपाद्य तदन्नमण्डमार्द्रवालुकोपहितनवशरावगतमतिमृदुना तालवृन्तानिलेन शीतलीकृत्य सलवणसंभारं दत्ताङ्गारधूपवासं च संपाद्य तदप्यामलकं श्लक्ष्णपिष्टमुत्पलगन्धि

32. 2. अस्यामेव च तत्परीक्ष्य B. C omits च. अस्यामेव W.—32. 7. गांध-शालीन A. B.—सा च कन्यका C. W omits अथ.—32. 16. °कणवुसादीन (*sic*) A. °कणकिंवुसादीन् B.—

कृत्वा धात्रीमुखेण स्नानाय तमचोदयत् । तया च स्नानशुद्धया दत्ततैलामलकः क्रमेण सस्नौ । स्नपितः सिक्तमृष्टे कुट्टिमे फलकमारुह्य पाण्डुहरितत्रिभागशेषलूनस्याङ्गणकदलीपलाशस्योपरि शरावद्वयं दत्तमार्द्रमभिमृशन्नतिष्ठत् । सा तु तां पेयामेवाग्रे समुपाहरत् । पीत्वा चापनीतघर्मक्लमः प्रहृष्टः प्रक्लिन्नसकलगात्रः स्थितोभूत् । ततस्तस्य शाल्योदनस्य दर्वीद्वयं दत्त्वा सर्पिर्मात्रां सूपमुपदंशं चोपजहार । इमं च दध्ना च त्रिजातकावचूर्णितेन सुरभिशीतलाभ्यां च कालशेयकाञ्जिकाभ्यां शेषमन्नमभोजयत् । सशेष एवान्धस्यसावतृप्यत् । अयाचत च पानीयम् । अथ नवभृङ्गारसंभृतमगुरुधूपधूपितमभिनवपाटलाकुसुमवासितमुत्फुल्लोत्पलग्रथितसौरभं वारि धारात्मना पातयांबभूव । सोपि मुखोपहितशरावेण हिमशिशिरकणकरालितारुणायमानाक्षिपक्ष्मा धारारवाभिनन्दितश्रवणः स्पर्शसुखोद्भिन्नरोमाञ्चकर्कशकपोलः परिमलप्रवाहोत्पीडफुल्लघ्राणरन्ध्रो माधुर्यप्रकर्षावर्जितरसनेन्द्रियः स्वच्छं पानीयमाकण्ठं पपौ । शिरःकम्पसंज्ञावारिता च पुनरपरेण करकेणाचमनमदत्त कन्या । वृद्धया तु तदुच्छिष्टमपोह्य हरितगोमयोपलिप्ते कुट्टिमे स्वमेवोत्तरीयकर्पटं व्यवधाय क्षणमशेत । परितुष्टश्च विधिवदुपयम्य कन्यां निन्ये । नीत्वैतदनपेक्षः कामपि गणिकामवरोधमकरोत् । तामप्यसौ प्रियसखीमिवोपाचरत् । पतिं च दैवतमिव मुक्ततन्द्रा पर्यचरत् । गृहकार्याणि चाहीनमन्वतिष्ठत् । परिजनं च दाक्षिण्यनिधिरात्माधीनमकरोत् । तद्गुणवशीकृतश्च भर्ता सर्वमेव कुटुम्बं तदायत्तमेव कृत्वा

---

33. 2. स्नातः C. W.—फलं A.—33. 3. पांडुकरित (*sic*) A. पांडुरिहतस्य (*sic*) B. पांडुहरितस्य C. W.—33. 4. अतिष्ठत A.—33. 5. अपनीताध्वश्रमः W.—°गात्रं A.—33. 6. उपदशं A. B.—33. 7. इयं C.—C W omit second च.—33. 8. °काजिकाभ्यां A.—33. 9. अवतृप्यत W.—C omits च.—33. 10. A omits ग्रथित.—°सौरभवारि A. C.—33. 11. नालीधारात्मना W.—°उपहृत A.—33. 12. A omits कण.—कलित for करालित C.—33. 13. A omits स्पर्श.—प्रवाल for प्रवाह A. W.—33. 14. तदच्छं for स्वच्छं C. W.—33. 16. कुट्टिमे चोत्तरीय° A.—

तदेकाधीनजीवितशरीरस्त्रिवर्गे निर्विवेश । तद्ब्रवीमि गृहिणः प्रियहिताय दारगुणा इति ।

ततस्तदनुयुक्तो निम्बवतीवृत्तमाख्यातवान्। अस्ति सौराष्ट्रेषु वलभी नाम नगरी । तस्यां गृहगुप्तनाम्नो गुह्यकेन्द्रतुल्यविभवस्य नाविकपतेर्दुहिता रत्नवती नाम । तां किल मधुमत्याः समुपागम्य बलभद्रो नाम सार्थवाहपुत्रः पर्यणैषीत् । तया च नववध्वा रहसि रभसविघ्नितसुरतसुखो झटिति द्वेषमल्पेतरं बबन्ध । न तां पुनर्द्रष्टुमिष्टवान्। तद्गृहगमनमपि सर्वसुहृद्वाक्यशतातिवर्ती लज्जया परिजहार । तां च दुर्भगां तदा प्रभृत्येव नेयं रत्नवती निम्बवती चेयमिति परिजनः परिबभूव । गते च कस्मिंश्चित्काले सानुतप्यमाना का मे गतिरिति विमृशन्ती कामपि वृद्धप्रव्राजिकां मातृस्थानीयां देवशेषकुसुमैरुपस्थितामपश्यत् । तस्याः पुरो रहसि सकरुणं रुरोद । तयाप्युदश्रुमुख्या बहुप्रकारमनुनीय रुदितकारणं पृष्टा त्रपमाणापि कार्यगौरवात्कथंचिदब्रवीत्। अम्ब किं ब्रवीमि । दौर्भाग्यं नाम जीवन्मरणमङ्गनानां विशेषतश्च कुलवधूनाम् । तस्याहमस्म्युदाहरणभूता । मातृप्रमुखोपि ज्ञातिवर्गो मामवज्ञयैव पश्यति । तेन सुदृष्टां मां कुरु । न चेत्त्यजेयमद्य निष्प्रयोजनान्प्राणान् । आ विरामाच्च रहस्यं न श्राव्यमिति पादयोः पपात । सैनामुत्थाप्योद्बाष्पोवाच । वत्से माध्यवस्यः साहसम् । इयमस्मि त्वन्निदेशवर्तिनी । यावन्ममोपयोगस्तव तावद्भवाम्यनन्याधीना । यद्येवासि निर्विण्णा तपश्चर त्वं मदधिष्ठिता पारलौकिकाय कल्याणाय । नन्वयमुदर्कः प्राक्तनस्य दुष्कृतस्य यदनेनाकारेणेदृशेन शीलेन जात्या चैवंभूतया सम-

34. 2. दारगुण इति A. B. C. W.—34. 3. पुनस्तेन C. ततस्तेन W.—नितंबवती A.—सुराष्ट्रेषु A.—34. 4. गुह्यकेश्वर C.—C omits तुल्य.—34. 6. तयापि W.—34. 7. °विघ्नितसमागमेच्छा C. °विघ्नितसुखो W.—34. 8. तद्गृहागमनमपि A. W.—W omits सर्व. C W omit शत.—34. 9. C omits च.—34. 10. C. कालांशे. W. कालान्तरे.—34. 12. अश्रुमुख्या A.—34. 17. मे रहस्यं C. W.—34. 18. वाच्यं C.—प्रोवाच B. W.—34. 19. यावति...तावति C. W.—34. 20. यद्येवमसि C.—

नुगता सत्यकस्मादेव भर्तृद्वेष्यतां गतासि । यदि कश्चिदस्त्युपायः पति द्रोहप्रतिक्रियायै दर्शयामुम् । मतिर्हि ते पटीयसीति । अथासौ कथंचित्क्षणमधोमुखी ध्यात्वा दीर्घोष्णश्वासपूर्वमवोचत् । भगवति पतिरेव दैवतं वनितानां विशेषतश्च कुलजानाम् । अतस्तच्छुश्रूषणाभ्युपायहेतुभूतं किंचिदाचरणीयम् । अस्त्यस्मत्प्रातिवेश्यो वणिक् । अभिजनेन विभवेन राजान्तरङ्गभावेन च सर्वपौरानतीत्य वर्तते । तस्य कन्या कनकवती नाम मत्समानरूपावयवा ममातिस्निग्धा सखी । तया सह तद्विमानहर्म्यतले ततोपि द्विगुणमण्डिता विहरिष्यामि । त्वया तु तन्मातृप्रार्थनां नाम सकरुणमभिधाय मत्पतिरेतद्गृहं कथंचनानेयः । समीपगतेषु च युष्मासु क्रीडामत्ता नाम कन्दुकं भ्रंशयेयम् । अथ तमादाय तस्य हस्ते दत्त्वा वक्ष्यसि । पुत्र तवेयं भार्यासखी निधिपतिदत्तस्य सर्वश्रेष्ठिमुख्यस्य कन्या कनकवती नाम । त्वामियमनवस्थो निष्करुणश्चेति रत्नवतीनिमित्तमत्यर्थं निन्दति । तदेष कन्दुको विपक्षधनं प्रत्यर्पणीयमिति । स तथोक्तो नियतमुन्मुखीभूय तामेव प्रियसखीं मन्यमानो मां बद्धाञ्जलि याचमानायै मह्यं भूयस्त्वत्प्रार्थितः साभिलाषमर्पयिष्यति । तेन रन्ध्रेणोपश्लिष्य रागमुज्ज्वलीकृत्य यथासौ कृतसंकेतो देशान्तरमादाय मां गमिष्यति तथोपपादनीयमिति। हर्षाभ्युपेतया चानया तथैव संपादितम् । अथैतां कनकवतीति वृद्धतापसीविप्रलब्धो बलभद्रः सरत्नसाराभरणामादाय निशि नीरन्ध्रे तमसि प्रावसत् । सा तु तापसी वार्त्तामापादयत् । मन्देन मया निर्निमित्तमुपेक्षिता रत्नवती श्वशुरौ च परिभूतौ सुहृदश्चातिवर्तिताः। तदत्रैव संसृष्टो जीवितुं जिह्रेमीति बलभद्रः पूर्वेद्युर्मामकथयत् । नूनमसौ तेन नीता । व्यक्तिश्चाचिराद्भविष्यतीति । तच्छ्रुत्वा तद्बान्धवास्तदन्वेषणं प्रति शिथिलप्रयत्नास्तस्थुः । रत्नवती तु मार्गे कांचित्पण्यदासीं

35. 4. वनितानां दैवतं A.—°जातानां C.—35. 9. °प्रार्थनं A. C. W.—35. 10. B omits नाम.—35. 14. A B C धनंन.—A omits स.—मामेव C, omitting मां below.—35. 17. मामादाय C.—सहर्षाभ्युपेतया तया C.—35. 18. तथैतां B. अथ तां C.—35. 19. सरत्नाभरणां सरत्नसारभूषणं (*sic*) C. W.—35. 20. C omits तु.—

संगृह्य तयोह्यमानपाथेयाद्युपस्करा खेटकपुरमगमत् । अमुत्र च व्यवहारकुशलो बलभद्रः स्वल्पेनैव मूल्येन महद्धनमुपार्जयत् । पौराग्रण्यश्चासीत् । परिजनश्च भूयानर्थवशात्तमाजगाम । ततस्तां प्रथमदासीं न कर्म करोषि दृष्टं मुष्णास्यप्रियं ब्रवीषीति परुषमुक्त्वा बह्वताडयत् । चेटी तु प्रसादकालोपाख्यातरहस्यवृत्तान्तैकदेशमात्तरोषा निर्बिभेद । तच्छ्रुत्वा तु लुब्धेन दण्डवाहिना पौरवृद्धसंनिधौ निधिपतिदत्तस्य कन्यकां कनकवतीं मोषेणापहृत्यास्मत्पुरे निवसत्येष दुर्मतिर्बलभद्रः । तस्य सर्वस्वहरणं न भवद्भिः प्रतिबन्धनीयमिति नितरामतर्जयत । भीतं च बलभद्रमाभिजगाद रत्नवती । न भेतव्यम् । एवं ब्रूहि । नेयं निधिपतिदत्तस्य कन्या कनकवती । वलभ्यामेव गृहगुप्तदुहिता रत्नवती नामेयं दत्ता पितृभ्यां मया च न्यायोढा । न चेत्प्रतीथ प्रणिधिं प्रहिणुतास्या बन्धुपार्श्वमिति । बलभद्रस्तु तथोक्त्वा श्रेणीप्रातिभाव्येन तावदतिष्ठद्यावत्तत्पुरवृद्धलेखलब्धवृत्तान्तो गृहगुप्तः खेटकपुरमागत्य सह जामात्रा दुहितरमतिप्रीतिः प्रत्यनैषीत् । तथा दृष्ट्वा रत्नवती कनकवतीति भावयतस्तस्यैव बलभद्रस्यातिवल्लभा जाता । तद्ब्रवीमि कामो नाम संकल्प इति ।

तदनन्तरमसौ नितम्बवतीवृत्तान्तमप्राक्षीत् । सोऽहमब्रवम् । अस्ति शूरसेनेषु मथुरा नाम नगरी । तत्र कश्चित्कुलपुत्रः कलासु गणिकासु चातिसक्तो मित्त्रार्थे कलत्रार्थे च स्वभुजमात्रनिर्व्यूढानेककलहः कलहकण्टक इति कर्कशैरभिख्यापिताख्यः प्रत्यवात्सीत् । स चैकदा कस्यचिदागन्तोश्चित्रकरस्य हस्ते चित्रपटं ददर्श । तत्र काचिदालेख्यगता युवतिरालोचनमात्रेणैव कलहकण्टकस्य कामातुरं चेतश्चकार । स च तमब्रवीत् । भद्र विरुद्धमिवैतत्प्रतिभाति । यतः कुलजादुर्लभं

---

36. 4. सपरुषं C.—36. 6. A omits तु.—36. 7. कन्यां W.—36. 9 अतर्जयत् C.—अभर्त्सयत W.—रत्नवती जगाद बलभद्रं C.—न भेतव्यं २ A.—36. 10. C omits एवं.—निधिपतिदत्तकन्या B. W.—C. मम भार्या for वलभ्यामेव.—36. 11. प्रत्ता C.—36. 12. न चेत्प्रतीतिरस्मिन्नर्थे C.—36. 13. अतिष्ठत् C. अवातिष्ठत् W.—36. 18. मधुरा W.

वपुः । आभिजात्यशंसिनी च नम्रता । पाण्डुरा च मुखच्छविः । नातिपरिभोगसुलभा च तनुः । प्रौढतानुविद्धा च दृष्टिः । न चैषा प्रोषितभर्तृका प्रवासचिह्नस्य वेण्यादेरदर्शनात् । लक्ष्म चैतद्दक्षिणपार्श्ववर्ति । तदियं वृद्धस्य कस्यचिद्वणिजो नातिपुंस्त्वस्य यथार्हसंभोगालाभपीडिता गृहिणी त्वयातिकौशलाद्यथादृष्टमालिखिता भवितुमर्हतीति । स तमतिप्रशस्याशंसत् । सत्यमिदम् । अवन्तिपुर्यामुज्जयिन्यामनन्तकीर्तिनाम्नः सार्थवाहस्य भार्या यथार्थनामा नितम्बवती नाम । एषा सौन्दर्यविस्मितेन मयैवमालिखितेति । स तदैवोन्मनायमानस्तद्दर्शनाय परिव्राजोज्जयिनीम् । भार्गवो नाम भूत्वा भिक्षामिषेण तद्गृहं प्रविश्य तां ददर्श । दृष्ट्वा चात्यारूढमन्मथो निर्गत्य पौरमुख्येभ्यः श्मशानरक्षामयाचतालभत च । तत्र लब्धैश्च शवावगुण्ठनपटादिभिः कामप्यर्हन्तिकां नाम श्रमणिकामुपासांचक्रे । तन्मुखेन च नितम्बवतीमुपनिमन्त्रयामास । सा चैनां निर्भर्त्सयन्ती प्रत्याचचक्षे । श्रमणिकामुखाच्च दुष्करशीलभ्रंशां कुलस्त्रियमुपलभ्य रहसि दूतिकामित्यशिक्षयत् । भूयोप्युपतिष्ठ सार्थवाहभार्याम् । ब्रूहि चोपह्वरे संसारदोषदर्शनात्समाधिमास्थाय मुमुक्षमाणो मादृशो जनः कुलवधूनां शीलपातने घटत इति क्व घटते । एतदपि त्वामत्युदारया समृद्ध्या रूपेणातिमानुषेण प्रथमेन वयसोपपन्नां किमितरनारीसुलभं चापलं स्पृष्टं न वेति परीक्षिता । तुष्टास्मि तवैवमदुष्टभावतया । त्वामिदानीमुत्पन्नापत्यां द्रष्टुमिच्छामि । भर्ता भवत्याः केनचिद्ग्रहेणाधिष्ठितः पाण्डुरोगदुर्बलो भोगे चासमर्थः स्थितोभूत् । न च शक्यमस्य विघ्नमप्रतिकृत्यापत्यमस्माल्लब्धुम् । अतः प्रसीद वृक्षवाटिकामेकाकिनी प्रविश्य मदुपनीतस्य कस्यचिन्मन्त्रवादिनः स्वच्छन्दमेव हस्ते चरणमर्पयित्वा तदभिमन्त्रितेन प्रणयकुपिता नाम भूत्वा भर्तारमुरसि प्रहर्तुमर्हसि ।

37. 7. °नामधेया C.—37. 18. त्वामप्युदारतया A.—37. 19. ङपपन्नासि...सुलभचापलस्पृष्टा C.—चपलं· A.—37. 21. भर्ता तु C. W.—37. 22. तस्य W.—37. 24. स्वच्छं A. स्वच्छन्नं:—

उपर्यसावुत्तमधातुपुष्टिमूर्जितापत्योत्पादनक्षमामासादयिष्यति । अनुवर्तिष्यते देवतामिवात्रभवतीम् । नात्र शङ्का कार्येति । सा तथोक्ता व्यक्तमभ्युपैष्यति । नक्तं मां वृक्षवाटिकां प्रवेश्य तामपि प्रवेशयिष्यसि । तावतैव त्वयानुगृहीतो भवेयमिति । सा तथैवोपपादितवती । सोतिप्रीतस्तस्यामेव क्षपायां वृक्षवाटिकां गतो नितम्बवतीं निर्ग्रन्थिकाप्रयत्नोपनीतां पादे परामृशन्निव हेमनूपुरमेकमाकृष्य छुरिकयोरुमूले किंचिदुल्लिख्य द्रुततरमपासरत् । सा तु सान्द्रत्रासा स्वमेव दुर्नयं गर्हमाणा जिघांसन्तीव श्रमणिकां तद्व्रणं भवनदीर्घिकायां प्रक्षाल्य पटेन च बध्वामयापदेशादपरं चापनीय नूपुरं शयनपरा त्रिचतुराण्यहान्येकान्त एव निन्ये । स तु धूर्तो विक्रेष्य इति तेन नूपुरेण तमनन्तकीर्तिमुपाससाद । स दृष्ट्वा मम गृहिण्या एवैष नूपुरः । कथमयमुपलब्धस्त्वयेति तमब्रुवाणं निर्बन्धेन पप्रच्छ । स तु वणिग्ग्रामस्याग्रे वक्ष्यामीति स्थितोभूत् । पुनरसौ स्वगृहिण्यै नूपुरयुगलं प्रेषयेति संदिदेश । सा च सलज्जंससाध्वसं चाद्य रात्रौ विश्रामप्रविष्टायां वृक्षवाटिकायां प्रभ्रष्टो ममैकः प्रशिथिलबन्धो नूपुरः । सोद्याप्यन्विष्टो न दृष्टः । स पुनरयं द्वितीय इत्यपरं प्राहिणोत् । अनया च वार्त्तयामुं पुरस्कृत्य स वणिग्जनसमाजमाजगाम । स चानुयुक्तो धूर्तः सविनयमावेदयत् । विदितमेव खलु वो यथाहं युष्मदाज्ञया पितृवनमाभिरक्ष्य तदुपजीवी प्रतिवसामि । लुब्धाश्च कदाचिन्मद्दर्शनभीरवो निशि दहेयुरपि शवानीति निशास्वपि श्मशानमधिशये । अपरेद्युर्दग्धादग्धं मृतं चितायाः प्रसभमाकर्षन्तीं श्यामाकारां नारीमपश्यम् । अर्थलोभात्तु भयं निगृह्य सा संनिगृहीता । शस्त्रिकया यदृच्छयोरुमूले किंचिदुल्लिखितम् । एष च नूपुरश्चरणा-

38. 2. देवीं C. W.—38. 3. नक्तं च A.—38. 4. त्वयाहं C. W.—38. 7. सत्रासा A. B C.—38. 8. स्वस्यैव C.—38. 9. प्रक्षाल्य दत्वा पटबन्धनं सा भयापदेशात् W.—38 11. एष एव A.—38. 14. विश्रम्भ° C.—38. 15. C omits मम. 38. 16. A omits सोद्याप्यन्विष्टो न दृष्टः.—38. 17. स वणिग्जनः C omits जन.—38. 22. अर्थलाभात्तु निगृह्य ससाध्वसं W.—निगृहीता C. गृहीता W.—

दाक्षिप्तः । तावत्येव द्रुतगतिः सा पलायिष्ट । सोयमस्यागमः । परं भवन्तः प्रमाणमिति । विमर्शे च तस्याः शाकिनीत्वमैकमत्येन पौराणामभिमतमासीत् । भर्त्रा च परित्यक्ता तस्मिन्नेव श्मशाने बहु विलप्य पाशेनोद्बध्य मर्तुकामा तेन धूर्तेन नक्तमगृह्यत । अनुनीता च । सुन्दरि त्वदाकारोन्मादितेन मया त्वदावर्जने बहूनुपायान्भिक्षुकीमुखेणोपन्यस्य तेष्वसिद्धेषु पुनरयमुपायो यावज्जीवमसाधारणीकृत्य रन्तुमाचरितः । तत्प्रसीदानन्यशरणायास्मै दासजनायेति मुहुर्मुहुश्चरणयोर्निपत्य प्रयुज्य सान्त्वनशतानि तामगत्यन्तरामात्मवश्यामकरोत् । तदिदमुक्तं दुष्करसाधनं प्रज्ञेति ।

स चेदमाकर्ण्य ब्रह्मराक्षसो मामपूजयत् ।अस्मिन्नेव क्षणे नातिप्रौढपुंनागमुकुलस्थूलानि मुक्ताफलानि सह सलिलबिन्दुभिरम्बरतलादपतन् । अहं तु किं न्विदमित्युच्चचक्षुरालोकयन्कमपि राक्षसं कांचिदङ्गनां विचेष्टमानगात्रीमाकर्षन्तमपश्यम् । कथमयमपहरत्यकामामपि स्त्रियमनाचारो नैर्ऋत इति गगनगमनमन्दशक्तिरशस्त्रश्च समतप्ये । स तं मत्संबन्धी ब्रह्मराक्षसस्तिष्ठ तिष्ठ पाप क्वापहरसीति निर्भर्त्सयन्नुत्थाय राक्षसेन समसृज्यत । तां तु रोषादनपेक्षापविद्धाममरवृक्षमञ्जरीमिवान्तरिक्षादापतन्तीमुन्मुखप्रसारितोभयकरः कराभ्यां सदयमग्रहीषम् । उपगृह्य च वेपमानां संमीलिताक्षीं मदङ्गस्पर्शसुखोद्भिन्नरोमाञ्चां तादृशीमेव तामनवतारयन्नेवातिष्ठम् । तावत्तावुभावपि शैलशृङ्गभङ्गैः पादपैश्च रभसोन्मूलितैर्मुष्टिपादप्रहारैश्च परस्परमक्षपयेताम् । पुनरहमतिमृदुनि पुलिनवति कुसुमलवलाञ्छिते सरस्तीरेवरोप्य सस्पृहं निर्वर्णयंस्तां मत्प्राणैकवल्लभां राजकन्यकां कन्दुकावतीमलक्षयम् । सापि मया समाश्वास्यमाना

39. 2. डाकिनीत्वं C.—39. 3. A omits च, but marks a gap of one akshara.—अथ भर्त्रा C.—39. 4. शापेन A.—39. 6. अस्मिन् A.—अभ्युपायो C.—39. 10. W omits स. C writes लमाकर्ण्य (*sic*).—39. 12. आलोक्य C. आलोकयम्.—39. 13. अथ कथमपहरत्ययं C. W omits अयं.—निष्कामां W.—39.14. नैर्ऋतिशक्तिः A.—39. 17. करं कराभ्यां A. करकराभ्यां B. C omits कराभ्यां.—39. 20. °प्रहारैश्च जानुभिश्च C.—39. 22. B C omit लव.—39. 23. सुह्मराजकन्यां C.—

तिर्यङ्मुखमभिनिरूप्य जातप्रत्यभिज्ञा सकरुणमरोदीत् । अवादीच्च । नाथ त्वद्दर्शनादुपोढरागा तस्मिन्कन्दुकोत्सवे पुनः सख्या चन्द्रसेनया त्वत्कथाभिरेव समाश्वासितास्मि । त्वं किल समुद्रमध्ये मज्जितः पापेन मद्भ्रात्रा भीमधन्वनेति श्रुत्वा सखीजनं परिजनं च वञ्चयित्वा जीवितं जिहासुरेकाकिनी क्रीडावनमुपासरम् । तत्र च मामचकमत कामरूप एष राक्षसाधमः । सोयं मया भीतयावधूतप्रार्थनः स्फुरन्तीं मां निगृह्याभ्यधावत् । अत्रैवमवसितोभूत् । अहं च दैवात्तवैव जीवितेशस्य हस्ते पतिता । भद्रं तवेति श्रुत्वा चानया सहावरुह्य नावमध्यारोहम् । मुक्ता च नौः प्रतिवातप्रेरिता तामेव दामलिप्तां प्रत्युपातिष्ठत । अवरूढाश्च वयमश्रमेण । तनयस्य च तनयायाश्च नाशादनन्यपत्यस्तुङ्गधन्वा सुह्मपतिर्विकलः स्वयं सकलत्र एव निष्कलङ्कगङ्गारोधस्यनशनेनोपरन्तुं प्रतिष्ठते । सह तेन मर्तुमिच्छत्यनन्यनाथोनुरक्तः पौरवृद्धलोक इत्यश्रुमुखीणां प्रजानामाक्रन्दमशृणुम । अथाहमस्मै राज्ञे यथावृत्तमाख्याय तदपत्यद्वयं प्रत्यर्पितवान् । प्रीतेन तेन जामाता कृतोस्मि दामलिप्तेश्वरेण । तत्पुत्रो मदनुजीवी जातः । मदाज्ञप्तेन चामुना प्राणवदुज्झिता चन्द्रसेना कोशदासमेवाभजत् । ततश्च सिंहवर्मसाहाय्यार्थमत्रागत्य भर्तुस्तव दर्शनोत्सवसुखमनुभवामीति ।

श्रुत्वा चित्रेयं दैवगतिरवसरेषु पुष्कलः पुरुषकार इति भूयः स्मिताभिषिक्तदन्तच्छदे मन्त्रगुप्ते हर्षोत्फुल्लं चक्षुः पातयामास देवो राजवाहनः । स किल करकमलेन किंचित्संवृताननो ललितवल्लभारभसदत्तदन्तक्षतव्यसनविह्वलाधरमणिर्निरोष्ठ्यवर्णमात्मचरितमाचचक्षे ।

इति श्रीदण्डिनः कृतौ दशकुमारचरिते मित्रगुप्तचरितं नाम षष्ठ उच्छ्वासः ।

---

40. 2. तस्मिन्नेव C.—C omits पुनर्.—40. 4. पापतमेन C.—C omits परिजनं च.—40. 5. जीवीतं च B. पुनरेकाकिनी C.—उपागमम् C. W.—40. 6. एव A.—40. 7. सोवसितो C.—40. 8. °शेषस्यास्मि C.—वया C. W.—40. 9. प्रत्युपातिष्ठत् C.—40. 11. अनपत्यः C.—40. 13. B omits लोक.—पर्यश्रु° B.—40. 15. °पुत्रश्च C.—40. 16. त्यक्ताप्राणादूर्जिता चंद्रसेना A. C.—40. 21. A omits व्यसन.—

राजाधिराजनन्दन नगरन्ध्रगतस्य ते गतिं ज्ञास्यन्नहं च गतस्तदा कलिङ्गान् । कलिङ्गनगरस्य च नात्यासन्नसंस्थितजनदाहस्थानसंसक्तस्य कस्यचित्कान्तारधरणिजस्यास्तीर्णसरसकिसलयसंस्तरे तले निषद्य निद्रालीढदृष्टिरशयिषि । जगति च कालरात्रिशिखण्डजालकान्धकारे चरितरक्षसि क्षरितनीहारे निजनिलयनिलीननिःशेषजने नितान्तशीते निशीथे घनतरसालशाखान्तरालनिर्ह्रादि नेत्रनिंसिनीं निद्रां निगृह्णत्कर्णदेशं गतं कथं खलेनानेन दग्धसिद्धेन रिरंसाकाले निदेशं दित्सता जन एष रागेणानर्गलेनार्दित इत्थं खिलीकृतः क्रियेतास्याणकनरेन्द्रस्य केनचिदनन्तशक्तिना सिद्धयन्तराय इति किंकरस्य किंकर्याश्चातिकातरं रटितं । तदाकर्ण्य क एष सिद्धः का च सिद्धिः किं चानेन किंकरेण करिष्यत इति दिदृक्षाक्रान्तहृदयः किंकरगतया दिशा किंचिदन्तरं गतस्तरलतरनरास्थिशकलरचितालंकारकान्तकायं दहनदग्धकाष्ठनिष्ठाङ्गाररजःकृताङ्गरागं तरलतडिल्लताकारजटाधरं हिरण्यरेतस्यरण्यचक्रान्धकारराक्षसे क्षणक्षणगृहीतनानेन्धनग्रासचञ्चदर्चिषि दक्षिणेतरेण करेण तिलसिद्धार्थकादीनि निरन्तरचटचटायितानि किरन्तं कंचिदद्राक्षं । तस्याग्रे स कृताञ्जलिः किंकरः किं करणीयं दीयतां निदेश इत्यतिष्ठत् । आदिष्टश्च तेनायमतिनिकृष्टाशयेन । गच्छ कलिङ्गराजस्य कर्दनस्य कन्यकां कनकलेखां कन्यागृहादिहानयेति । स च तथाकार्षीत् । ततश्च तां त्रासेनालघीयसा चास्रजर्जरेण च कण्ठेन रणरणिकागृहीतेन च हृदयेन हा तात हा जननीति क्रन्दन्तीं कीर्णग्लानशेखरस्रजि शीर्णनहने शिरसिजानां संचये निगृ-

41. 1. नगरन्ध्रं B.—B omits च.—41. 2. W omits च.—41. 3. °किसलये संस्तरे तले A. C omits संस्तरे.—41. 5. निशान्तशीते A.—41. 6. घनतरशाखिशाखा° C. W.—अंतराले C.—°निह्रादि A. °निर्ह्रादिनि B. C.—41. 7. दग्धनरेंद्रेण A. C.—41. 8. रागेणानेनार्दित B. रागेणांतर्गतेनानर्गलेन C.—41. 9. अस्थानकनरेंद्रस्य C.—सिद्धांताय A.—41. 13. W omits तरल.—41. 15. °आदान् B.—41. 16. C omits स.—किंकरः किंकरी च B. C. 41. 17. C omits किं करणीयं.—अयं तेनातिकृष्टाशयेन W.—41. 18. कन्यां W.—41. 19. एनां W.—अलघीयस्य चाश्रुजर्जरेण A. अलघीयसा साश्रु—41. 20. रणरणक° C.—

ह्यसिना शिलाशितेन शिरश्चिकर्तिषयाचेष्टत। झटिति चाच्छिद्य तस्य हस्तात्तां ह्यसिकां तया निकृत्य तच्छिरः सजटाजालं निकटस्थस्य कस्यचिज्जीर्णसालस्य रन्ध्रे न्यधिषि। तन्निध्याय हृष्टतरः स राक्षसः क्षीणाधिरकथयत्। आर्य कदर्यस्यास्य कदर्थनान्न कदाचिन्निद्रायाति नेत्रे। तर्जयति त्रासयति चाकृत्ये चाज्ञां ददाति। तदत्र कल्याणराशिना साधीयः कृतं यदेष नरकाकः कारणानां नारकीणां रसज्ञानाय नीतः शेते शीतेतरदीधितिदेहजस्य नगरे। तदित्थं दयानिधेरनन्ततेजसस्तेयं जनः कांचिदाज्ञां चिकीर्षति। आदिशालं कालहरणेनेत्यनंसीत्। आदिक्षं च तं सखे सैषा सज्जनाचरिता सरणिर्यदणीयसि कारणेनणीयानादरः संदृश्यते न चेदिदं नेच्छसि सेयं संनताङ्गयष्टिरक्लेशार्हा सत्यनेनाकृत्यकारिणात्यर्थं क्लेशिता नयैनां निजनिलयं नान्यदितः किंचिदस्ति चित्ताराधनं न इति। अथ तदाकर्ण्य कर्णशेखरनीलनीरजायितां धीरेतरतारकां दृशं तिर्यक्किंचिदञ्चितां संचारयन्ती सलिलचरकेतनशरासनानतां चिल्लिकालतां ललाटरङ्गस्थलीलास्यनर्तकीं लीलालसं लासयन्ती कण्टकितरक्तगण्डलेखा रागलज्जान्तरालचारिणी चरणाग्रेण धरणीतलं तिरश्चीननखार्चिश्चन्द्रिकेण साचीकृताननसरसिजं लिखन्ती दन्तच्छदकिसलयलङ्घिना हर्षास्रसलिलधाराशीकरकणजालसंकेदितस्य स्तनतटचन्दनस्यार्द्रतां निरस्यतास्यान्तरालनासान्तरनिःसृतेन तनीयसानिलेन हृदयलक्ष्यदलनदक्षरतिसहचरसायकस्यदायितेन तरंगतदशनचन्द्रिकाणि कानिचिदेतान्यक्षराणि कलकण्ठीकलान्यसृजत्। आर्य केन कारणेनैनं दासजनं कालहस्तादाच्छिद्यानन्तरं रागानिलचलितरणरणिकातरंगिण्यनङ्गसागरे किरसि। यथा ते चरणसरसिजरजःकणिका तथाहं

42. 1. शितेन for शिलाशितेन B. C. शिलासितेन A. So also Pa[d]. (शिलावदसितः श्यामः).—42. 2. नस्य छिरः A. तस्य तच्छिरः W.—42. 3. न्यदधां A. B. न्यदाश्चिषि (*sic*) C.—42. 7. नगरं A. C. W.—42. 11. B omits सत्यनेन.—B omits निज.—42. 12. किंचित्किंचित्° A.—42. 13. °निलीननील° Pa[d].—धीरेतरतरलतारकां A. धीरतरल Pa[d].—42. 21. °स्य दयितेन.—

चिन्तनीया । यद्यस्ति दया तेत्र जनेनन्यसाधारणः करणीयः स एष चरणाराधनक्रियायाम् । यदि च कन्यागाराध्यासने रहस्यक्षरणादनर्थ आशङ्क्यते नैतदस्ति । रक्ततरा हि नस्तत्र सख्यश्चेटच्श्च । यथा न कश्चिदेतज्ज्ञास्यति तथा यतिष्य इति । स चाहं देहजेनाकर्णाकृष्टसायकासनेन चेतस्यनिर्दयं हतस्तत्कटाक्षकालायसनिगडगाढसंयतः किंकराननिहितदृष्टिरगादिषं यथेयं रथचरणजघना कथयति तथा चेन्नाचरेयं नयेत नक्रकेतनः क्षणेनैकेनाकीर्तनीयां दशां जनं चेनं सहानया नय कन्यागृहं हरिणनयनयेति । नीतश्चाहं निशाचरेण शारदजलधरकान्ति कन्यकानिकेतनं तत्र च कांचित्कालकलां चन्द्राननानिदेशाच्चन्द्रशालैकदेशे तद्दर्शनचलितधृतिरतिष्ठं । सा च च्छन्दतः शयानाः करतलालससंघट्टनापनीतनिद्राः काश्चिदधिगतार्थाः सखीरकार्षीत् । अथागत्य ताश्चरणनिहितशिरसः क्षरदस्रकरालितेक्षणा निजशेखरकेसराग्रसंलग्नषट्चरणगणरणितसंशायितकलगिरः शनैरकथयन् । नाथ यदत्यादित्यतेजसस्त एषा नयनलक्ष्यतां गता ततः कृतान्तेन न गृहीता । दत्ता चेयं चित्तजेन गरीयसा साक्षीकृत्य रागानलं । तदनेनाश्चर्यरत्नेन नलिनाक्षस्य ते रत्नशैलशिलातलस्थिरं रागतरलेनालंक्रियतां हृदयं । तदस्याश्चरितार्थे स्तनतटं गाढालिङ्गनैः सदृशतरस्य सहचरस्येति । ततः सखीजनेनातिदक्षिणेन दृढतरीकृतस्नेहनिगलस्तया संनताङ्ग्या संगत्यारंसि ।

अथ कदाचिदायासितजायारहितचेतसि लालसालिलङ्घनग्लानघनकेसरे राजदरण्यस्थलीललाटलीलायिततिलके ललितानङ्गराजाङ्गीकृतनिर्निद्रकर्णिकारकाञ्चनच्छत्रे दक्षिणदहनसारथिरयाहतसहकाराङ्कुलग्नचञ्चलचञ्चरीककलिके कालाण्डजकण्ठरागरक्तरक्ताधरारतिरणामसंनाहशालिनि शालीनकन्यकान्तःकरणसंक्रान्तकान्तरागलङ्घितलज्जे दर्दुरगिरितटचन्दनाश्लेषशीतलानिलाचार्यदत्तनानालतानृत्त-

43. 2. रहस्यारक्षणात् A.—43. 3. C omits नस्तत्र.—43. 11. स्वच्छन्दतः W.—43. 19. °निगडः W.—43. 22. गलितनिद्र° A. B.—

लीले काले कलिङ्गराजः सह निजाङ्गनाजनेन सह च तनयया सकलेन च नगरजनेन दश त्रीणि च दिनानि दिनकरकिरणजालालङ्घनीये रणदलिसंघलङ्घितनतलताग्रकिसलयालीढसैकततटे तरलतरंगशीकरासारसङ्गशीतले सागरतीरकानने क्रीडारसजातासक्तिरासीत् । अथ संततगीतसंगीतसंगताङ्गनासहस्रशृङ्गारहेलानिरर्गलानङ्गसंघर्षहर्षितश्च रागतृष्णैकतन्त्रस्तत्र रन्ध्रेन्ध्रनाथेन जयसिंहेन सलिलतरणसाधनानीतेनानीकेनानेकसंख्येन द्रागागत्यागृह्यत सकलत्रः । सा चानीयत त्रासचञ्चलाक्षी दयिता नः सह सखीजनेन कनकलेखा । तदाहं दाहेनानङ्गदहनजनितेनान्तरिताहारस्त्रिचश्चिन्तयन्दयितां गलितगात्रकान्तिरित्यतर्कयं । गता सा कलिङ्गराजतनया सह जनयित्रा जनन्या चारिहस्तं । गतधैर्यश्च तां स राजा नियतं संजिघृक्षेत् । तदसहा च सा सती गररसादिना सद्यः संतिष्ठेत । तस्यां च तादृशीं दशां गतायां जनस्यास्यानन्यजेन हन्येन शरीरधारणाशा । का स्याद्गतिरिति ।

अत्रान्तरेन्ध्रनगरादागच्छन्नग्रजः कश्चिदैक्ष्यत । तेन चेयं कथा कथिता । यथा किल जयसिंहेन नैकनिकारदत्तसंघर्षेण जिघांसितः स कर्दनः कनकलेखाकारदर्शनैधितेन रागेणारक्ष्यत । सा च दारिका यक्षेण केनचिदधिष्ठिता न तिष्ठत्यग्रे नरेन्द्रस्य नरान्तरस्य च । आयास्यति च नरेन्द्रसार्थसंग्रहणेन नरेन्द्रस्तन्निराकरिष्यन्न चास्ति सिद्धिरिति । तेन चाहं दर्शिताशः शंकरनृत्तदेशजातस्य जरत्सालस्य स्कन्धरन्ध्रान्तर्जटाजालं निष्कृष्य तेन जटिलतां गतः कन्थाचीरसंचयान्तरितसकलगात्रः कांश्चिच्छिष्यानग्रहीषं । तांश्च नानाश्चर्यक्रियातिसंहिताज्जनादाकृष्टान्नचेलादित्यागान्नित्यहट्टानकार्षं । अयासिषं च दिनैः कैश्चिदन्ध्रनगरं । तस्य नात्यासन्ने सलिलराशिसदृशस्य कलहंसगणदलित-

44. 3. °चलङ्गता° A.—44. 10. A omits राज.—जनयित्रा जनन्या सह C. जनित्रा जनयित्र्या च सह W.—44. 11. निरस्तधैर्यः W.—44. 15. ऐक्षत A. B.—44. 16. अनेक° C. W.—

नलिनदलसंहतिगलितकिञ्जल्कशकलशारस्य सारसश्रेणिशेखरस्य सरसस्तीरकानने कृतनिकेतनः स्थितः। शिष्यजनकथितचित्रचेष्टाकृष्टसकलनागरजनातिसंधानदक्षः सन्दिशि दिशीत्यकीर्त्यै जनेन। य एष जरदरण्यसरस्तटे सलिलशायी यतिस्तस्य किल सकलानि सरहस्यानि सषडङ्गानि च छन्दांसि रसनाग्रे संनिहितानि। अन्यानि च शास्त्राणि येन यानि न ज्ञायन्ते स तेषां तत्सकाशादर्थनिर्णयं करिष्यति। असत्येनास्य नास्यं संसृज्यते। सशरीर एष दयाराशिः। एतत्संग्रहणादचिरेण चरितार्था दीक्षा। तच्चरणरजःकणैः कैश्चन शिरसि कीर्णैरनेकस्यानेक आतङ्कश्चिकित्सनैरसंहार्यः संहृतः। तदङ्घ्रिक्षालनसलिलसेकनिष्कलङ्कशिरसां नश्यन्ति क्षणेनैकेनाखिलनरेन्द्रयत्नलङ्घिनश्चण्डतरग्रहाः। न तस्य शक्यं शक्तिरियत्ताज्ञानं। न चास्याहंकारकणिकेति। सा चेयं कथा नैकजनास्यसंचारिणी तस्य कनकलेखाधिष्ठितधनदाज्ञाकरनिराक्रियासक्तचेतसः क्षत्रियस्याकर्षणायाशकत्। स चाहरहरागत्यादरेणातिगरीयसार्चयन्नर्थैश्च शिष्यान्संगृह्णन्नधिगतक्षणः कदाचित्काङ्क्षितार्थसाधनाय शनैरयाचिष्ट। ध्यानधीरः स्थानदर्शितज्ञानसंनिधिश्चैनं निरीक्ष्य निचाय्याकथयं। तात स्थान एष हि यत्नः। तस्य हि कन्यारत्नस्य सकलकल्याणलक्षणैकराशेराधिगतिः क्षीरसागररशनालंकृताया गङ्गादिनदीसहस्रहारयष्टिराजिताया धराङ्गनायाश्चासादनाय साधनं। न च स यक्षस्तदधिष्ठायी केनचिन्नरेन्द्रेण तस्या लीलाञ्चितनीलनीरजदर्शनाया दर्शनं सहते। सह्यन्तां तत्र त्रीण्यहानि यैरहं यतिष्येऽर्थस्यास्य साधना-

---

45. 1. नालिनगणस[सं]हति° A. B omits नलिन.—45. 2. शिष्यगण° A.—45. 4. B omits सलिल, writing °तटैशायी. स्थण्डिलशायी. W.—अस्य A. C.—रहस्यानि A. W.—45. 7. अस्यास्यं न C.—सशरीरश्च W.—45. 8. यच्चरण° C.—45. 9. अनेकस्थानेऽनेक C.—45. 10. C omits एकेन.—45. 11. चंडग्रहाः C. the reading of A and B is corrupt.—45. 12. अनेक° W.—45. 14. छंदयन् A. उदयन् B.—अर्थेन C.—45. 16. निरीक्ष्य निश्चित्य A. C. निरीक्ष्य निचाय्य W.—45. 19. W omits स.—45. 20. A omits नील.—45. 21. तदत्र सह्यंतां C. W.—सहायैरहं A.—

येति । तथादिष्टे हृष्टतरे गते क्षितीशे निशि निर्निशाकरार्चिषि नीरन्ध्रान्धकारनिकरनिगीर्णदशदिशि निद्रानिगलितनिखिलजनदृशि निर्गत्य जलतलनिलीनगाहनीयं नीरन्ध्रं कृच्छ्राच्छिद्रीकृतान्तरालं तदेकतः सरस्तटं तीर्थसंनिकृष्टं केनचित्खननसाधनेनाकार्षम् । घनशिलेष्टिकाच्छन्नच्छिद्राननं तत्सरस्तीरदेशं जनैरशङ्कनीयं निश्चित्य दिनादिस्नाननिर्णिक्तगात्रश्च नक्षत्रसंतानहारि हारयष्टयग्रग्रथितरत्नं क्षणदान्धकारगन्धहस्तिदारणैककेसरिणं कनकशैलशृङ्गरङ्गलास्यलीलानटं गगनसागरघनतरंगराजिलङ्घनैकचक्रं कार्याकार्यसाक्षिणं सहस्रार्चिषं सहस्राक्षदिगङ्गनारक्तचन्दनाङ्गरागरागायितकिरणजालं रक्तनीरजाञ्जलिनाराध्य निजनिकेतनं चाध्यशिश्रियं ।

याते च दिनत्रयेस्तगिरिशिखरगैरिकतटसाधारणच्छायतेजस्यचलराजकन्यकाकदर्थनयान्तरिक्षाख्येण शंकरशरीरेण संसृष्टायाः संध्याङ्गनाया रक्तचन्दनचर्चितैकस्तनकलशदर्शनीये दिनाधिनाथे जनाधिनाथः स आगत्य जनस्यास्य धरणिन्यस्तचरणनखकिरणच्छादितकिरीटः कृताञ्जलिरतिष्ठत् । आदिष्टश्च । दिष्ट्या दृष्टेष्टसिद्धिः । इह जगति न हि निरीहं देहिनं श्रियः श्रयन्ते । श्रेयांसि च सकलान्यनलसानां हस्ते नित्यसांनिध्यानि । यतस्ते साधीयसा सच्चरितेनानाकलितकलङ्केनार्चितेनात्यादरनिचितेनाकृष्टचेतसा जनेनानेन सर इदं तथा संस्कृतं यथेह तेद्य सिद्धिः स्यात् । तदेतस्यां निशि गलदर्धायां गाहनीयं । गाहनानन्तरं च सलिलतले सततगतीनन्तश्चारिणः संनिगृह्य यथाशक्ति शय्या कार्या । ततश्च तटस्खलितजलस्थगितजलजखण्डचलितदण्डकण्टकाग्रदलितदेहराजहंसत्रासजर्जररासितदत्तकर्णस्य जनस्य क्षणाकर्णनीयं जनिष्यते

46. 1. तथादिष्टे यथादिष्टे च A.—हृष्टं W.—C omits गते. W puts it after क्षितीशे.—निःशिनिशि A. W.—46. 3. नरिंध्रं कृत्वा B.—46. 5. W omits सरः.—46. 7. रंगस्थली C.—46. 11. जाते A.—46. 12. संहृष्टायाः C.—45. 16. हि न W.—निरीहदेहिनं C. W.—संश्रयंते B. W.—श्रेयांसि च. B adds किल.—45. 23. संदत्तकर्णस्य B.—W. क्षणादाकर्णनीयं W.—

जलसंघातस्य किंचिदारटितं । शान्ते च तत्र सलिलरटिते क्लिन्नगात्रः किंचिदारक्तदृष्टिर्यैनाकारेण निर्यास्यति निचाय्य तस्य निखिलजननेत्रानन्दकरस्य न स यक्षः शक्ष्यत्यग्रे स्थितये । स्थिरतरनिहितस्नेहशृङ्खलानिगडितं च कन्यकारत्नं क्षणेनैकेनासहनीयदर्शनान्तरायं स्यात् । अस्याश्च धराङ्गनाया नात्यादरनिराकृतारिचक्रं चक्रं करतलगतं चिन्तनीयं । न तत्र संशयः । तच्चेदिच्छसि नैकशास्त्रज्ञानधीरधिषणैरधिकृतैरितरैश्च हितैषिगणैर्विचार्य जालिकशतं चानाय्यानन्तरं नरशतैर्यथेष्टदृष्टान्तरालं सरः क्रियेत । रक्षा चात्र तीराच्चिंशद्दण्डान्तरे सैनिकजनेन सादरं रचनीया । कस्तज्जानाति यच्छिद्रेणारयश्चिकीर्षन्तीति । तत्तस्य हृदयहारि जातं । तदधिकृतैश्च तत्र कृत्ये रन्ध्रदर्शनासहैरिच्छां च राज्ञः कन्यकातिरागजनितां नितान्तनिश्चलां निश्चित्यार्थ एष न निषिद्धः । तथास्थितश्च तदासादनदृढतराशयः स आख्यायत । राजन्नत्र जनान्ते चिरं स्थितं । न चैकत्र चिरं स्थानं नः शस्तं । कृतकृत्यश्च न इह द्रष्टासि । यस्य राष्ट्र आतिथेयाद्यासादितं तस्य ते किंचिदनाचर्य कार्यं गतिरार्यगर्ह्येति । अत्रैतच्चिरस्थानस्य कारणम् । तच्चाद्य सिद्धम् । गच्छ गृहान् । यथार्हजलेन हृद्यगन्धेन स्नातः सितस्रगङ्गरागः शक्तिसदृशेन दानेनाराधितधरणितलैस्तिलगणस्तिलस्नेहसिक्तयष्टचग्रग्रथितवर्तिकाग्निशिखासहस्रग्रस्तनैशान्धकारराशिरागत्यार्थसिद्धये यतेथा इति । स किल कृतज्ञतां दर्शयन्नसिद्धिरेषा सिद्धिर्यदसंनिधिरिहार्याणां । कष्टा चेयं निःसंगता या निरागसं दासजनं त्याजयति न च निषेधनीया गरीयसां गिर इति स्नानाय गृहानयासीत् । अहं च निर्गत्य निर्जने निशीथे सरस्तीररन्ध्रनिलीनः सन्नीषच्छिद्रदत्तकर्णः स्थितः । स्थिते

---

47. 1. क्लान्तगात्रः A. B.—47. 4. °निगलितं A. B.—47. 6. अनेकशास्त्र° W.—47. 7. निधार्यानंतरं नरशतयथेष्ट° (*sic*) A. निर्धायगतरं (*sic*) जालिकसतं चानाय्य अं (*sic*) नरशतैः B.—47. 8. B W omit अत्र.—A omits तीरात्.—47. 11. नितांतनिश्चितां B.—47. 14. यस्य ते B. C. D. W.—47. 15. ग्रासाद्यासादितं C. W.—B47. 18. धरणिलेखगणः A.—47. 22. A omits निर्गत्य.—

चार्धरात्रे कृतयथादिष्टक्रियः स्थानस्थानरचितरक्षः स राजा जालिकजनानानीय निराकृतान्तःशल्यं शङ्काहीनः सरःसलिलं सलीलगतिरगाहत । गतश्च कीर्णकेशं संहतकर्णनासं सरस्तलं हास्तिनं नक्रलीलया नीरनिलीनयायी । तं तथाशयानं कन्थया कंधरायां न्यग्रहीषम् । खरतरकालदण्डघट्टनातिचण्डैश्च करचरणार्गलाघातैर्निर्दयदत्तनिग्रहः क्षणेनैकेनाजहात्स चेष्टां । ततश्चाकृष्य तच्छरीरं तीरच्छिद्रे निधाय नीरान्निरयासिषं । सद्यः संगतानां च सैनिकानां तदत्यचित्रीयताकारान्तरग्रहणं । गजस्कन्धगतः सितच्छत्रादिसकलराजचिह्नराजितश्चण्डतरदण्डिदण्डताडनत्रस्तजनदत्तान्तरालया राजरथ्यायातस्तां निशां नयनरसनिरस्तनिद्रारतिरत्यनैषं । नीते च जनाक्षिलक्ष्यतां लाक्षारसदिग्धदिग्गजशिरःसदृक्षे शक्रदिगङ्गनारत्नादर्शैकचक्रे कृतकरणीयः किरणजालकरालरत्नराजिराजितराजार्हासनाध्यासी यथासदृशाचारदर्शिनः शङ्कायन्त्रिताङ्गान्संनिधिनिषादिनः सहायानगादिषं । दृश्यतां शक्तिरार्षी यत्तस्य यतेरजेयस्येन्द्रियाणां संस्कारेण नीरजसा नीरजसांनिध्यशालिनि सहर्षालिनि सरसि सरसिजदलसंनिकाशच्छायस्याधिकतरदर्शनीयस्याकारान्तरसिद्धिरासीत् । अद्य किल सकलनास्तिकानां जायेत लज्जानतं शिरः । तदिदानीं चन्द्रशेखरनरकशासनसरसिजासनादीनां त्रिदशेशानां स्थानान्यत्यादररचितनृत्यगीतार्चनाञ्चितानि क्रियन्ताम् । ह्रियन्तां गृहादितः क्लेशनिरसनसहान्यर्थिसार्थैर्धनानीति । आश्चर्यरसातिरेकहृष्टदृष्टयश्च ते जय जय जगदीश दश दिशः स्थगयन्निजतेजसादिराजयशांसीत्यसकृदाशास्याचरन्यथादिष्टाः क्रियाः । स चाहं दयितायाः सखीं ह-

48. 3. गतश्च A. C. W. गतंश्च (*sic*) B.—°कर्णनासिकं B. W. C corrects °नासं to नासिकं.—हस्तनक्रलीलया A.—48. 4. नीरनीलया B. C.—W omits कन्थया.—48. 9. °दत्तान्तरया B. C. W.—48. 10. निशां तया सस° (*sic*) A. निशां नयरस B.—48. 17. W omits किल.—48. 18. °आदर° B. C. W.—48. 19. °गीताचनानि (*sic*) B. °गीतायाराधनानि C. W.—48. 21. A's reading is corrupt. B omits one जय.—निर्जेन B. ते जय जगदीश स्वतेजसातिशय्य दशदिशः स्थगयन्निजेन यशसादिराजयशांसि.—

दयस्थानीयां शशाङ्कसेनां कन्यां कदाचित्कार्यान्तरागतां रहस्याचक्षिषि । कच्चिदयं जनः कदाचिदासीदृष्ट इति । अथ सा हर्षकाष्ठां गतेन हृदयेनेषदालक्ष्य दशनदीधितिलतां लीलालसं लासयन्ती हसन्ती लीलाञ्चितकरशाखान्तरितदन्तच्छदकिसलया हर्षजलक्लेदजर्जरनिरञ्जनेक्षणा रचिताञ्जलिर्नितरां जाने यदि न स्यादैन्द्रजालिकस्य जालं किंचिदेतादृशं । तत्कथं चैतत्कथयेति स्नेहनिर्यन्त्रणं शनैरगादीत् । अहं चैतदस्यै कार्त्स्न्येनाख्याय तदाननसंक्रान्तेन संदेशेन संजनय्य सहचर्या निरतिशयं हृदयाह्लादनं । ततश्चेतया दयितया निरर्गलीकृतातिसत्कृतकलिङ्गनाथन्यायदत्तया संगत्यान्ध्रकलिङ्गराज्यशासी तस्यास्यारिणा लिलङ्घयिषितस्याङ्गराजस्य साहाय्यकायालघीयसा साधनेनागत्यात्र ते सखिगणसंगतस्य यादृच्छिकदर्शनानन्दराशिलङ्घितचेता जात इति ।

तस्य तत्कौशलं स्मितज्योत्स्नाभिषिक्तदन्तच्छदः सह सुहृद्भिरभिनन्द्य चित्रमिदं महामुनेर्वृत्तम् । अत्रैव खलु फलितमतिकष्टं तपः । तिष्ठतु भवन्नर्म । प्रकर्षस्पृशोः प्रज्ञासत्त्वयोर्दृष्टमिह स्वरूपमित्यभिधाय पुनरवतरतु भवानिति बहुश्रुते विश्रुते विकचराजीवसदृशं चक्षुश्चिक्षेप क्षितीशपुत्रः ।

इति श्रीदण्डिनः कृतौ दशकुमारचरिते मन्त्रगुप्तचरितं नाम सप्तम उच्छ्वासः ।

---

49. 6. अवादीत् B.—49. 7. B C W omit एतत्.—

सोप्याचचक्षे । देव मयापि परिभ्रमता विन्ध्याटव्यां कोपि कुमारः क्षुधा तृषा च क्लिश्यन्क्लेशार्हः क्वचित्कूपाभ्याशेष्टवर्षदेशीयो दृष्टः । स च त्रासगद्गदमगदत् । महाभाग क्लिष्टस्य मे क्रियतामार्य साहाय्यकम् । अस्य मे प्राणापहारिणीं पिपासां प्रतिकर्तुमुदकमुदञ्चन्निह कूपे कोपि निष्कलो ममैकशरणभूतः पतितः । तमलमस्मि नाहमुद्धर्तुमिति । अथाहमभ्येत्य व्रतत्या कयापि वृद्धमुत्तार्य तं च बालं वंशनालीमुखोद्धृताभिरद्भिः फलैश्चतुःपञ्चैः शरक्षेपोच्छ्रितस्य लकुचवृक्षस्य शिखरात्पाषाणपातितैः प्रत्यानीतप्राणवृत्तिमापाद्य तरुतलनिषण्णस्तं जरन्तमब्रवम् । तात क एष बालकः । को वा भवान् । कथं चेयमापदापन्नेति । सोश्रुगद्गदमगदत् । श्रूयतां महाभाग । विदर्भो नाम जनपदः । तस्मिन्भोजवंशभूषणमंशावतार इव धर्मस्यातिसत्त्वः सत्यवादी वदान्यः सुविनीतो विनेता प्रजानां रञ्जितभृत्यः कीर्तिमानुदग्रो मूर्तिबुद्धिभ्यामुत्थानशीलः शास्त्रप्रमाणः शक्यभव्यकल्पारम्भी संभावयिता बुधान्प्रभावयिता सेवकानुद्भावयिता बन्धून्न्यग्भावयिता शत्रूनसंबद्धप्रलापेष्वदत्तकर्णः कदाचिदप्यवितृष्णो गुणेष्वतिनदीष्णः कलासु नेदिष्ठो धर्मार्थसंहितासु स्वल्पेपि सुकृते सुतरां प्रत्युपकर्ता प्रत्यवेक्षिता कोशवाहनयोर्यत्नेन परीक्षिता सर्वाध्यक्षाणामुत्साहयिता कृतकर्मणामनुरूपैर्दानमानैः सद्यः प्रतिकर्ता दैवमानुषीणामापदां षाड्गुण्योपयोगनिपुणो मनुमार्गेण प्रणेता चातुर्वर्ण्यस्य पुण्यश्लोकः पुण्यवर्मा नामासीत् । स पुण्यैः कर्मभिः प्राप्य पुरुषायुषं पुनरपुण्येन प्रजानामगण्यताममरेषु । तदनन्तरमनन्तवर्मा नाम तदायतिरवनिमध्यतिष्ठत् । स सर्वगुणैः समृद्धोपि दैवाद्दण्डनीत्यां नात्यादृतोभूत् । तमेकदा रहसि वसुरक्षितो नाम मन्त्रिवृद्धः पितुरस्य बहुमतः प्रगल्भ-

50. 7. बालकं A.—फलैश्च पञ्चशैः—50. 8. लिकुच° B. W.—आपद्य A. उत्थाय C. W.—50. 9. बाल: C. W.—50. 10. अवदत् A. B.—50. 11. तस्मिन्नपि A.—50. 13. भूतिबुद्धिभ्यां A. बुद्धिमूर्त्तिभ्यां C.—शास्त्रप्रमाणकः C. W.—50. 17. A omits the words प्रत्यवेक्षिता...प्रतिकर्ता.—

वागभाषत । तात सर्वैवात्मसंपदभिजनात्प्रभृत्यन्यूनैवात्रभवति लक्ष्यते । बुद्धिश्च निसर्गपट्वी कलासु नृत्तगीतादिषु चित्रेषु च काव्यविस्तरेषु प्राप्तविस्तारा तवेतरेभ्यः प्रतिविशिष्यते । तथाप्यसावप्रतिपद्यात्मसंस्कारमर्थशास्त्रेष्वनग्निसंशोधितेव हेमजातिर्नातिभाति बुद्धिः । बुद्धिशून्यो हि भूभृदत्युच्छ्रितोपि परैरध्यारुह्यमाणमात्मानं न चेतयते । न च शक्तः साध्यं साधनं वा विभज्य वर्तितुम् । अयथावृत्तश्च कर्मसु प्रतिहन्यमानः स्वैः परैश्च परिभूयते । न चावज्ञातस्याज्ञा प्रभवति प्रजानां योगक्षेमयोराराधनाय । अतिक्रान्तशासनाश्च प्रजा यत्किंचनवादिन्यो यथाकथंचिद्वर्तिन्यः सर्वाः स्थितीः संकिरेयुः । निर्मर्यादाश्च लोका लोकादितोमुतश्च स्वामिनमात्मानं च भ्रंशयेयुः । आगमदीपदृष्टेन खल्वध्वना सुखेन वर्तते लोकयात्रा । दिव्यं हि चक्षुर्भूतभवद्भविष्यत्सु व्यवहितविप्रकृष्टेषु च विषयेषु शास्त्रं नामाप्रतिहतवृत्ति । तेन हीनः सतोरप्यायतविशालयोर्लोचनयोरन्ध एव जन्तुरर्थदर्शनेष्वसामर्थ्यात् । अतो विहाय बाह्यविद्यास्वभिषङ्गमागमय स्वकुलविद्यां दण्डनीतिम् । तदर्थानुष्ठानेन चावर्जितशक्तिसिद्धिरस्खलितशासनः शाधि चिरमुदधिमेखलामुर्वीमिति ।

एतदाकर्ण्य स्थान एव गुरुभिरनुशिष्टं तथा क्रियत इत्यन्तःपुरमविशत् । तां च वार्त्तां पार्थिवेन प्रमदासंनिधौ प्रसङ्गेनोदीरितामुपनिशम्य समीपोपविष्टश्चित्तानुवृत्तिकुशलः प्रसादवित्तो गीतनृत्यवादित्रादिष्ववाह्यो बाह्यनारीपरायणः पटुरयन्त्रितमुखो बहुभङ्गिविशारदः परमर्मान्वेषणपरः परिहासयिता परिवादरुचिः पैशुन्यपण्डितः सचिवमण्डलादप्युत्कोचहारी सकलदुर्नयोपाध्यायः कामतन्त्रकर्णधारः कुमारसेवको विहारभद्रो नाम स्मितपूर्वं व्यज्ञापयत् । देव दैवानुग्रहेण यदि कश्चिद्भाजनं भवति विभूतेस्तमकस्मादुच्चावचैरुपप्रलोभनैः कदर्थयन्तः स्वार्थं साधयन्ति धूर्ताः । तथा हि । केचित्प्रेत्य

51. 8. A omits प्रजानां.—51. 10. ते लोका A.—51. 12. C omits च.—A B omit अप्रतिहतवृत्ति.—51. 19. उपशम्य A.—गीतनृत्य C. W.—

किल लभ्यैरभ्युदयातिशयैराशामुत्पाद्य मुण्डयित्वा शिरो बद्ध्वा दर्भरज्जुभिरजिनेनाच्छाद्य नवनीतेनोपलिप्यानशनं च शाययित्वा सर्वस्वं स्वीकरिष्यन्ति । तेभ्योपि घोरतराः पाषण्डिनः पुत्रदारशरीरजीवितान्यपि मोचयन्ति। यदि कश्चित्पटुजातीयो नास्यै मृगतृष्णिकायै हस्तगतं त्यक्तुमिच्छेत्तमन्ये परिवार्याहुः । एकामपि काकिणीं कार्षापणलक्षमापादयेम शस्त्रादृते सर्वशत्रून्घातयेमैकशरीरमात्रमपि मर्त्यं चक्रवर्तिनं विदधीमहि यद्यस्मदिष्टेन मार्गेणाचर्यत इति । स पुनरिमान्प्रत्याह । कोसौ मार्ग इति । पुनरिमे ब्रुवते। ननु चतस्रो राजविद्यास्त्रयी वार्त्तान्वीक्षिकी दण्डनीतिरिति । तासु तिसृस्त्रयीवार्त्तान्वीक्षिक्यो महत्यो मन्दफलाश्च । तास्तावदासताम् । अधीष्व तावद्दण्डनीतिम् । इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता । सैवेयमधीत्य सम्यगनुष्ठीयमाना यथोक्तकर्मक्षमेति । स तथेत्यधीते शृणोति च । अत्रैव जरां गच्छति । तत्तु किल शास्त्रं सर्वशास्त्रानुबन्धि । सर्वमेव वाङ्मयमविदित्वा न तत्त्वतोधिगंस्यते । भवतु कालेन बहुनाल्पेन वा तदधिगतिः । अधिगतशास्त्रेण चादावेव पुत्रदारमपि न विश्वास्यम् । आत्मकुक्षेरपि कृते तण्डुलैरियद्भिरियानोदनः संपद्यते । इयत ओदनस्य पाकायैतावदिन्धनं पर्याप्तमिति मानोन्मानपूर्वकं देयम् । उत्थितेन च राज्ञा क्षालिताक्षालितमुखेन मुष्टिमर्धमुष्टिं वाभ्यन्तरीकृत्य कृत्स्नमायव्ययजातमह्नः प्रथमेष्टमे भागे श्रोतव्यम् । शृण्वत एवास्य द्विगुणमपहरन्ति तेध्यक्षधूर्ताः । चत्वारिंशच्चाणक्योपदिष्टानाहरणोपायान्सहस्रधात्मबुद्ध्यैव ते विकल्पयितारः । द्वितीयेन्योन्यं विवदमानानां प्रजानामाक्रोशाद्दह्यमानकर्णः कष्टं जीवति । तत्रापि प्राड्विवाकादयः स्वेच्छया जयपराजयौ विदधानाः पापेनाकीर्त्या च भर्तारमात्मानं चार्थैर्योजयन्ति। तृतीये स्नातुं भोक्तुं च लभते । भुक्तस्य च यावदप्यन्धः परिणा-

52. 3. °शरीरवित्तान्यपि C.—52. 8. असौ A.—52. 9. दंडनीतिरान्वीक्षिकीति A. B.—52. 10. ता for तावत् A.—52. 11. येयं C.—आर्य° A.—52. 13. तत्रैव C. W.—

मस्तावदस्य विषभयं न शाम्यत्येव । भुक्त्वा चतुर्थे हिरण्यप्रतिग्रहाय हस्तं प्रसारयन्नेव तिष्ठति । पञ्चमे मन्त्रचिन्तया महान्तमायासमनुभवति । तत्रापि मन्त्रिणो मध्यस्था इवान्योन्यं नियतं मिथः संभूय दोषगुणौ दूतचारवाक्याणि शक्याशक्यतां देशकालकार्यावस्थाः स्वेच्छया विपरिवर्तयन्तः स्वपरमित्रमण्डलान्युपजीवन्ति । बाह्याभ्यन्तरांश्च कोपान्गूढमुत्पाद्य प्रकाशं प्रशमयन्त इव स्वामिनमवशमवगृह्णन्ति । षष्ठे स्वैरविहारो मन्त्रो वा सेव्यः । स दह्यतां स्वैरविहारकालोयं यस्य तिस्रस्त्रिपादोत्तरा नाडिकाः । सप्तमे चतुरङ्गबलप्रत्यवेक्षणप्रयासः । अष्टमे सेनापतिसखस्य विक्रमचिन्ताक्लेशः । पुनरुपास्यैव संध्यां प्रथमे रात्रिभागे गूढपुरुषा द्रष्टव्याः। तन्मुखेनातिनृशंसाः शस्त्राग्निरसप्रणिधयोनुष्ठेयाः । द्वितीये भोजनानन्तरं श्रोत्रिय इव स्वाध्यायमारभते । तृतीये तूर्यघोषेण संविष्टश्चतुर्थपञ्चमौ शयीत किल । कथमिवास्याजस्रचिन्तायासविह्वलमनसो वराकस्य निद्रासुखमुपनमेत् । पुनः षष्ठे शास्त्रचिन्ताकार्यचिन्तारम्भः । सप्तमे मन्त्रग्रहो दूताभिप्रेषणानि च । दूताश्च नामोभयत्र प्रियाख्यानलब्धानर्थान्वीतशुल्कबाधवर्त्मनि वणिज्यया वर्धयन्तः कार्यमविद्यमानमपि क्लेशेनोत्पाद्यानवरतं भ्रमन्ति । अष्टमे पुरोहितादयोभ्येत्यैनमाहुः । अद्य दृष्टो दुःस्वप्नः । दुःस्थिताश्च ग्रहाः । शकुनानि नातिशुभानि । शान्तयः क्रियन्ताम् । सर्वमस्तु सौवर्णमेव होमसाधनम् । एवं सति कर्म गुणवद्भवति । ब्रह्मकल्पा इमे ब्राह्मणाः । कृतमेभिः स्वस्त्ययनं कल्याणतरं भवति । ते चामी कष्टदारिद्र्यवन्तो बह्वपत्या यज्वानो वीर्यवन्तश्चाद्याप्यप्रतिग्रहाः । दत्तं चैभ्यः स्वर्ग्यमायुष्यमरिष्टनाशनं च भवतीति बहु बहु दापयित्वा तन्मुखेन स्वयमुपांशु भक्षयन्ति । तदेवमहर्निशमविदितसुखलेशमायासबहुलमविरलकदर्थनं च नयतो नयज्ञस्यास्तां चक्रवर्तिता स्वमण्डल-

53. 3. W omits नियतं.—B omits मिथः.—53. 7. स दह्यत A. B. सोऽस्यैतावान् W.—53. 15. वीतशुल्कं निराबाधं.—53. 18. च तान्यशुभानि B. तान्यशुभानि C. चाशुभानि W.—53. 25. A omits च.

मात्रमपि दुरारक्षं भवेत् । शास्त्रज्ञसमाज्ञातो हि यद्ददाति यन्मानयति यच्च प्रियं ब्रवीति तत्सर्वमतिसंधातुमित्यविश्वासः । अविश्वास्यता हि जन्मभूमिरलक्ष्म्याः । यावता च नयेन विना याति लोकयात्रा स लोकत एव सिद्धः । न तत्र शास्त्रेणार्थः । ननु बालिशोपि हि तैस्तैरुपायैः स्तनपानं जनन्या लिप्सते । तदपास्यातियन्त्रणामनुभूयन्तां यथेष्टमिन्द्रियसुखानि । येप्युपदिशन्त्येवमिन्द्रियाणि जेतव्यान्येवमरिषड्वर्गस्त्याज्यः सामाद्युपायवर्गः स्वेषु परेषु चाजस्रं प्रयोज्यः संधिविग्रहचिन्तयैव नेयः कालः स्वल्पोपि सुखावकाशो न देय इति तैरप्येभिर्मन्त्रिबकैर्युष्मत्तश्चौर्यार्जितं धनं दासीगृहेष्वेव भुज्यते । के चैते वराकाः । येपि मन्त्रकर्कशाः शास्त्रतन्त्रकाराः शुक्राङ्गिरसविशालाक्षबाहुदन्तिपुत्रपराशरप्रभृतयस्तैः किमरिषड्वर्गो जितः । कृतं वा तैः शास्त्रानुष्ठानम् । तैरपि हि प्रारब्धेषु कार्येषु दृष्टे सिद्ध्यसिद्धी । पठन्तश्चापठद्भिरतिसंधीयमाना बहवः । नन्विदमुपपन्नं देवस्य यदुत सर्वलोकवन्द्या जातिरयातयामं वयो दर्शनीयं वपुरपरिमाणा विभूतिस्तत्सर्वं सर्वाविश्वासहेतुना सुखोपभोगप्रतिबन्धिना बहुमार्गविकल्पशास्त्रसर्वकार्येष्वमुक्तसंशयेन तन्त्रावापेनैव मा कृथा वृथा । सन्ति हि ते दन्तिनां दशसहस्राणि हयानां च लक्षत्रयमनन्तं च पादातम् । अपि च पूर्णान्येव हेमरत्नैः कोशगृहाणि । सर्वश्चैव जीवलोकः समग्रमपि युगसहस्रं भुञ्जानो न ते कोष्ठागाराणि रेचयिष्यति । किमिदमपर्याप्तं यदन्यार्जनायासः क्रियते । जीवितं हि नाम जन्मिनां चतुःपञ्चान्यहानि । तत्रापि भोगयोग्यमल्पाल्पं वयःखण्डम् । अपण्डिताः पुनरर्जयन्त एव ध्वंसन्ते । नार्जितस्य वसुनो लवमप्यास्वादयितुमीहन्ते । किं बहुना । राज्यभारं

---

54. 2. C W omit च.—54. 3. यावता च न विना नयेन लोकयात्रा B. यावता च नयेन भवंति लोकयात्रा C. W omits विना.—54. 4. न च C.—54. 10. मतिकर्कशाः W (मंत्रशास्त्रतन्त्रकाराः *sic* A).—54. 11. °विशालच्यवनपुत्र° A. B.—54. 16. बहुवर्ग° A.—C omits एव.—54. 17. C W omit च after हयानां.—54. 18. सर्वश्चैव A.—54. 21. जन्मवतां B. W.—54. 23. वस्तुनो A. W.—

भारक्षमेष्वन्तरङ्गभूतेषु भक्तिमत्सु समर्प्याप्सरःप्रतिरूपाभिरन्तःपुरिकाभी रममाणो गीतसंगीतपानगोष्टीश्च यथर्तु बध्नन्यथार्हं कुरु शरीरलाभमिति पञ्चाङ्गस्पृष्टभूमिरञ्जलिचुम्बितचूडश्चिरमशेत। प्राहसीत्प्रीतिफुल्ललोचनः प्रमदाजनः। जननाथश्च सस्मितमुत्तिष्ठ ननु हितोपदेशाद्गुरवो भवन्तः। किमिति गुरुत्वविपरीतमनुष्ठितमिति तमुत्थाप्य क्रीडारसनिर्भरमतिरतिष्ठत्।

अथैतेषु दिवसेषु भूयो भूयः प्रस्तुतेर्थे प्रेर्यमाणो मन्त्रिवृद्धेन वचसाभ्युपेत्य मनसैवाचित्तज्ञ इत्यवज्ञातवान्। अथैवं मन्त्रिणो मनस्यभूत्। अहो मे मोहाद्बालिश्यम्। अनुचितेर्थे चोदयन्नक्षिगतोहमस्य हास्यो जातः। स्पष्टमस्य चेष्टानामायथापूर्व्यम्। तथा हि। न मां स्निग्धं पश्यति। न स्मितपूर्वं भाषते। न रहस्यानि विवृणोति। न हस्तेन स्पृशति। न व्यसनेष्वनुकम्पते। नोत्सवेष्वनुगृह्णाति। न विलोभनवस्तूनि प्रेषयति। न मत्सुकृतानि प्रगणयति। न मे गृहवार्त्तां पृच्छति। न मत्पक्ष्यान्प्रत्यवेक्षते। न मामासन्नकार्येष्वभ्यन्तरीकरोति। न मामन्तःपुरं प्रवेशयति। अपि च। मामनर्हेषु कर्मसु नियुङ्क्ते। मदासनमन्यैरवष्टभ्यमानमनुजानाति। मद्वैरिषु विश्रम्भं दर्शयति। मदुक्तस्योत्तरं न ददाति। मत्समानदोषान्विगर्हयति। मर्मणि मामुपहसति। स्वमतमपि मया वर्ण्यमानं प्रतिक्षिपति। महार्हाणि वस्तूनि मत्प्रहितानि नाभिनन्दति। नयज्ञानां च स्खलितानि मत्समक्षं मूर्खैरुद्घोषयति। सत्यमाह चाणक्यः। चित्तज्ञानानुवर्तिनोनर्था अपि प्रियाः स्युः। दक्षिणा अपि तद्भावबहिष्कृता द्वेष्या भवेयुरिति। तथापि का गतिः। अविनीतोपि न परित्याज्यः पितृपैतामहैरस्मादृशैरयमधिपतिः। अपरित्यजन्तोपि कमुपकारमश्रूयमाणवाचः कुर्मः। सर्वथा नयज्ञस्य वसन्तभानोर-

55. 1. अंतरंगेषु B.—55. 3. अंजालिचूलि° A.—55. 7. तेषु A.—55. 13. मे प्रेषयाति C.—55. 18. कर्मणि A.—15. 19. B C W omit च.—55. 21. द्वेष्या for अनर्था and दक्षा for दक्षिणा A.—

श्मकेन्द्रस्य हस्ते राज्यमिदं पतितम् । अपि नामापदो भाविन्यः प्रकृतिस्थमेनमापादयेयुः । अनर्थेषु सुलभव्यलीकेषु क्वचिदुत्पन्नोपि द्वेषः सद्वृत्तमस्मै न रोचयेत् । भवतु । भविता तावदनर्थः । स्तम्भितपिशुनजिह्वो यथाकथंचिदभ्रष्टपदस्तिष्ठेयमिति ।

एवंगते मन्त्रिणि राजनि च कामवृत्ते चन्द्रपालितो नामाश्मकेन्द्रामात्यस्येन्द्रपालितस्य सूनुरसद्वृत्तः पितृनिर्वासितो नाम भूत्वा बहुभिश्चारणैर्बह्वीभिरनल्पकौशलाभिः शिल्पकारिणीभिरनेकच्छन्नकिंकरैश्च गूढपुरुषैः परिवृतोभ्येत्य विविधाभिः क्रीडाभिर्विहारभद्रमात्मसादकरोत् । अमुना चैव संक्रमेण राजन्यास्पदमलभत । लब्धरन्ध्रश्च स यद्यद्व्यसनमारभते तत्तथेत्यवर्णयत् । देव यथा मृगया ह्युपकारिकी न तथान्यत् । अत्र हि व्यायामोत्कर्षादापत्स्वपकर्ता दीर्घाध्वलङ्घनक्षमो जङ्घाजवः । कफापचयादारोग्यैकमूलाशयाग्निदीप्तिः । मेदोपकर्षादङ्गानां स्थैर्यकार्कश्यलाघवादीनि । शीतोष्णवातवर्षक्षुत्पिपासासहत्वं सत्त्वानामवस्थान्तरेषु चित्तचेष्टितज्ञानं हरिणगवलगवयादिवधेन सस्यलोपप्रतिक्रिया वृकव्याघ्रादिघातैः स्थलपथशल्यशोधनं शैलाटवीप्रदेशानां विविधकर्मक्षमाणामालोचनमाटविकवर्गविश्रम्भणमुत्साहशक्तिसंधुक्षणेन प्रत्यनीकवित्रासनमिति बहुतमा गुणाः । द्यूतेपि द्रव्यराशेस्तृणवत्त्यागादनुपमानमाशयौदार्यम् । जयपराजयानवस्थानाद्धर्षविषादयोरविधेयत्वम् । पौरुषैकनिमित्तस्यामर्षस्य वृद्धिः । अक्षहस्तभूम्यादिगोचराणामत्यन्तदुरुपलक्ष्याणां कूटकर्मणामुपलक्षणादत्यन्तं बुद्धिनैपुण्यम् । एकविषयोपसंहाराच्चित्तस्यातिचित्रमैकाग्र्यम् । अध्यवसायसहचरेषु साहसेष्वभिरतिः । अतिकर्कशपुरुषप्रतिसंसर्गादनन्यधर्षणीयता मानावधीरणमकृपणं च शरीरयापनमिति । उत्तमाङ्गनाभोगेप्यर्थध-

---

56. 9. A omits च.—56. 10. तत्तादित्यवर्णयत् B. C.—56. 13. °अतिलाघवानि B. C.—56. 15. °घातेन B. W.—56. 17. A omits शक्ति —56. 19. जयपराजयोरनवस्थानात् A.—56. 22. अचिंत्यं A.—अध्यवसायप्रहचरेषु A.—

र्मयोः सफलीकरणम् । पुष्कलः पुरुषाभिमानः । भावज्ञानकौशलम् । अलाभक्लिष्टमाचेष्टितम् । अखिलासु कलासु वैचक्षण्यम् । अलब्धोपलब्धिलब्धानुरक्षणरक्षितोपभोगभुक्तानुसंधानदृष्टानुनयादिष्वजस्रमभ्युपायरचनया बुद्धिवाचोः पाटवम् । उत्कृष्टशरीरसंस्कारात्सुभगवेषतया लोकसंभावनीयतया परं सुहृत्प्रियत्वम् । गरीयसी परिजनव्यपेक्षा । स्मितपूर्वाभिभाषित्वम् । उद्रिक्तसत्त्वता । दाक्षिण्यानुवर्तनम् । अपत्योत्पादनेनोभयलोकश्रेयस्करत्वमिति । पानेऽपि नानाविधरोगभङ्गपटीयसामासवानामासेवनात्स्पृहणीयवयोवस्थापनम् । अहंकारप्रकर्षादशेषदुःखतिरस्करणम् । अङ्गजरागदीपनादङ्गनोपभोगशक्तिसंधुक्षणम् । अपराधप्रमार्जनान्मनःशल्योन्मूलनम् । अशाठ्यशंसिभिरनर्गलप्रलापैर्विश्वासोपबृंहणम् । मत्सरानुबन्धादानन्दैकतानता । शब्दादीनामिन्द्रियार्थानां सातत्येनानुभवः । संविभागशीलतया सुहृद्वर्गसंवर्गणम् । अनुपमानमङ्गलावण्यम् । अनुत्तराणि विलसितानि । भयार्तिहरणाच्च सांग्रामिकत्वमिति । वाक्पारुष्यं दण्डो दारुणो दूषणानि चार्थानामेव यथावकाशमौपकारिकाणि । नहि मुनिरिव नरपतिरुपशमरतिरभिभवितुमरिकुलमलमवलम्बितुं च लोकतन्त्रमिति । असावपि गुरूपदेशमिवादरेण तस्य मतमन्ववर्तत । ततस्तच्छीलानुसारिण्यश्च प्रकृतयो विशृङ्खलमसेवन्त व्यसनानि । सर्वश्च स्वसमानदोषतया न कस्यचिच्छिद्रान्वेषणायायतिष्ट । समानभर्तृप्रकृतयस्तन्त्राध्यक्षाः स्वानि स्वानि कर्मफलान्यभक्षयन् । ततः क्रमादायद्वाराणि व्यशीर्यन्त । व्ययमुखानि विटविधेयतया विभोरहरहर्व्यवर्धन्त । सामन्तपौरजानपदमुख्याश्च समानशीलतयोपारूढविश्रम्भेण राज्ञा सजानयः पानगोष्ठीष्वभ्यन्तरीकृताः स्वं स्वमाचारमत्यचारिषुः । तदङ्गनासु चानेकापदेशपूर्वमपाचरन्नरेन्द्रः । तदन्तःपुरेषु चामी भिन्नवृत्तेषु मन्दत्रासा बहुसुखैरवर्तन्त । सर्वश्च कुलाङ्ग-

57. 14. वाचः पारुष्यं A. C.—57. 18. B C omit च.—57. 23. सजानपदाः A. सजनयः B.—

नाजनः पांसुलजनभङ्गिभाषणरतो भग्नचारित्रयन्त्रणस्तृणायापि न गणयित्वा भर्तृन्धातृगणमन्त्रणान्यशृणोत् । तन्मूलाश्च कलहाः सामर्षाणामुदभवन् । अहन्यन्त दुर्बला बलिभिः । अपहृतानि धनवतां धनानि तस्करादिभिः । अपहृतपरिहृतयः प्रहृताः पातकपथाः । हतबान्धवा हृतवित्ता वधबन्धातुराश्च मुक्तकण्ठमाक्रोशन्नश्रुकण्ठ्यः प्रजाः । दण्डश्चायथाप्रणीतो भयक्रोधावजनयत् । कृशकुटुम्बेषु लोभः पदमधत्त । विमानिताश्च तेजस्विनो माननादह्यन्त । तेषु तेषु चाकृत्येषु प्रासरन्परोपजापाः । तदा च मृगाटवीषु मृगबाहुल्यवर्णनेनाद्रिद्रोणीरनपसारमार्गाः शुष्कतृणवंशगुल्माः प्रवेश्य द्वारतोऽग्निविसर्गैर्व्याघ्रादिवधे प्रोत्साह्य तन्मुखपातनैरिष्टकूपतृष्णोत्पादनेनातिदूरहारितानां प्राणहारिभिः क्षुत्पिपासाभिवर्धनैर्गुल्मतृणगूढच्छन्नतटप्रदरपातहेतुभिर्विषममार्गप्रधावनैर्विषमुखीभिः क्षुरिकाभिश्चरणकण्टकोद्धरणैर्विष्वग्विसरविच्छिन्नानुयातृतयैकाकीकृतानां यथेष्टघातनैर्मृगदेहापराद्धैर्नामिषुमोक्षणैः सपणबन्धमधिरुह्याद्रिशृङ्गाणि दुरधिरोहाण्यनन्यलक्ष्यैः प्रभ्रंशनैराटविकच्छद्मना विपिनेषु विरलसैनिकानां प्रतिरोधैरक्षद्यूतपक्षियुद्धयात्रोत्सवादिसंकुलेषु बलवदनुप्रवेशनैरितरेषां हिंसोत्पादनैर्गूढोत्पादितव्यलीकेभ्यो प्रियाणि प्रकाशं लब्ध्वा साक्षिषु तद्विख्याप्याकीर्तिगुप्तिहेतुभिः पराक्रमैः परकलत्रेषु सुहृत्त्वेनाभियोज्य जारान्भर्तृनुभयं वा प्रहृत्य तत्साहसोपन्यासैर्योगनारीहारितानां संकेतेषु प्रागुपनिलीय पश्चादभिद्रुत्याकीर्तनीयैः प्रमापणैरुपप्रलोभ्य बिलप्रवेशनेषु निधानखननेषु मन्त्रसाधनेषु च विघ्नव्याजसाध्यैर्व्यापादनैर्मत्तगजाधिरोहणाय प्रेर्य प्रत्यपायनिवर्तनैर्व्यालहस्तिनं कोपयित्वा लक्षी-

---

58. 1. संलग्न for पांशुलजन A.—°भंगी° B. C.—58. 3. योद्धृभिः A बर्लीयेभिः C.—58. 4. °परिविभूतयः B. अपहृतपरिभूतयः C. W.—58. 7. A omits one तेषु.—58. 8. कृत्येषु corrected to our reading C.—मृगयुवेषेण B. C. मृगयुवेषता W.—58. 10. °वधं B. C. W.—58. 11. °पिपासादिवर्धनैः A. पिपासावर्धनैः C.—°तटप्रपातहेतुभिः A.—58. 16. अनुप्रविश्य C.—58. 17. B C omit प्रकाशं.—58. 20. अभिहत्य A.—प्रवेशेषु B. C.—58. 22. प्रत्यवाय° B. W.

कृतमुख्यमण्डलेष्वक्रमणैर्दायाद्यर्थे विवदमानानुपांशु हत्वा प्रतिपक्षेष्वयशःपातनैः सामन्तपुरजनपदेष्वयथावृत्तानप्रकाशमभिप्रहत्य तद्वैरिनामघोषणैर्योग्याङ्गनाभिरहर्निशमभिरमय्य राजयक्ष्मोत्पादनैर्वस्त्राभरणमाल्याङ्गरागादिषु रसधानकौशलैश्चिकित्सामुखेनामयोपबृंहणैरन्यैश्चाभ्युपायैरश्मकेन्द्रप्रयुक्तास्तीक्ष्णरसदादयः प्रक्षपितप्रवीरमनन्तवर्मकटकं जर्जरमकुर्वन् ।

अथ वसन्तभानुर्भानुवर्माणं वानवास्यं प्रोत्साह्यानन्तवर्मणा व्यग्राहयत् । तत्परामृष्टराष्ट्रपर्यन्तश्चानन्तवर्मा तमभियोक्तुं बलसमुत्थानमकरोत् । सर्वसामन्तेभ्यश्चाश्मकेन्द्रः प्रागुपेत्य प्रियतरोभूत् । अपरेपि सामन्ताः समगंसत । गत्वा चाभ्यराति नर्मदारोधसि न्यविशत् । तस्मिंश्चावसरे महासामन्तस्य कुन्तलपतेरवन्तिदेवस्यात्मनाटकीयां क्ष्मातलोर्वशीं नाम चन्द्रपालितादिभिरतिप्रशस्तनृत्तकौशलामाहूयानन्तवर्मा नृत्तमद्राक्षीत् । अतिरक्तश्च भुक्तवानिमां मधुमत्ताम् । अश्मकेन्द्रस्तु कुन्तलपतिमेकान्ते समभ्यधत्त । प्रमत्त एष राजा कलत्राणि नः परामृशति । कियत्यवज्ञा सोढव्या । मम शतमस्ति हस्तिनां पञ्चशतानि च ते । तदावां संभूय मुरलेशं वीरसेनमृचीकेश्वरमेकवीरं कोङ्कणपतिं कुमारगुप्तं नासिक्यनाथं च नागपालमुपजपावः । ते चावश्यमस्याविनयमसहमाना अस्मन्मतेनैवोपवर्तेरन् । अयं च वानवास्यः परं मे मित्रम् । अमुनैनं दुर्विनीतमग्रतो व्यतिषक्तं पृष्ठतः प्राहरेम । कोशवाहनं च विभज्य गृह्णीम इति । हृष्टेन चामुनाभ्युपेते विंशतिं वरांशुकानां पञ्चविंशतिं काञ्चनकुङ्कुमकम्बलानां प्राभृतीकृत्याप्रमुखेन तैः सामन्तैः संमन्त्र्य तानपि स्वमतावस्थापयत् । उत्तरेद्युस्तेषां सामन्तानां वानवास्यस्य चानन्तवर्मा नयद्वेषादामिषत्वमगमत् । वसन्तभानुश्च तत्कोशवाहनमवशीर्णमा-

---

59. 10. अभ्यर्णे W.—वटदारोधसि A.—59. 14. एव A.—59. 16. मत्तहास्तिनां A.—59. 17. ऋशीकेशं B. ऋषीकेश्वरं C. ऋचीकेशं W.—कुमारगुप्तसाहासिक्यनाथं (*sic*) A. कुमारगुप्तमासिक्यनाथं B. साशिक्यनाथं W.—59. 24. A omits तत्. C. तच्च कोशकोशवाहनवशीर्णं च वसंतभानुः.—

त्माधिष्ठितमेव कृत्वा यथाप्रयासं यथाबलं च विभज्य गृह्णीत युष्मदनुज्ञया येन केनचिदंशेनाहं तुष्यामीति शाठ्यात्सर्वानुवर्ती तेनैवामिषेण निमित्तीकृत्योत्पादितकलहः सर्वसामन्तानध्वंसयत् । तदीयं च सर्वस्वं स्वयमेवाग्रसत् । वानवास्यं केनचिदंशेनानुगृह्य प्रत्यावृत्य सर्वमनन्तवर्मराज्यमात्मसादकरोत् ।

अस्मिंश्चावसरे मन्त्रिवृद्धो वसुरक्षितः कैश्चिन्मौलैः संभूय बालमेनं भास्करवर्माणमस्यैव ज्यायसीं भगिनीं त्रयोदशवर्षां मञ्जुवादिनीमनयोश्च मातरं महादेवीं वसुंधरामादायापसर्पन्नापदोस्या भावितया दाहज्वरेण देहमजहात् । अस्मन्मित्रैस्तु नीत्वा माहिष्मतीं भर्तुर्द्वैमातुराय भ्रात्रे मित्रवर्मणे सापत्या देवी दर्शिताभूत् । तां चार्यामनार्योसावन्यथाभ्यमन्यत । निर्भर्त्सितश्च तया सुतमियमखण्डचारित्रा राज्यार्हं चिकीर्षतीति नैर्घृण्यात्तमेनं बालमजिघांसत् । इदं तु ज्ञात्वा देव्याहमाज्ञप्तः । तात नालीजङ्घ जीवतानेनार्भकेण यत्र क्वचिदवधाय जीवेः । जीवेयं चेदहमप्येनमनुसरिष्यामि । ज्ञापय मां क्षेमप्रवृत्तः स्ववार्त्तामिति । अहं तु संकुले राजकुले कथंचिदेनं निर्गमय्य विन्ध्याटवीं व्यगाहिषि । पादचारदुःखितं चैनमाश्वासयितुं घोषे क्वचिदहानि कानिचिद्विश्रमय्य तत्रापि राजपुरुषसंपातभीतो दुरध्वमपसरन्नत्रास्य दारुणपिपासापीडितस्य वारि दातुकामः कूपेस्मिन्नपभ्रश्य पतितस्त्वयैवमनुगृहीतः । त्वमेवास्यातः शरणमेधि विशरणस्य राजसूनोरित्यञ्जलिमबधात् । किमीया जात्यास्य मातेत्यनुयुक्ते मयामुनोक्तम् । पाटलिपुत्रकस्य वणिजो वैश्रवणस्य दुहितरि सागरदत्तायां कोसलेन्द्रात्कुसुमधन्वनोस्य माता जातेति । यद्येवमेतन्मातुर्मत्पितुश्चैको मातामह इति सस्नेहं तमहं सस्वजे । वृद्धेनोक्तम् । सिन्धुदत्तापुत्राणां कतमस्ते पि-

---

60. 8. अस्य A.—60. 9. अस्मादृशैर्मित्रैः B. W.—60. 13. अवस्थाय A.—जीव B.—60. 15. W omits राजकुले. A drops a line, omitting the words between निर्गमय्य and तत्रापि.—60. 16. पादचारदुःस्थितं B. दूरं B. W.—60. 20. किमीयोयमीत्यनुयुक्ते A.—60. 21. कौशल° A. कोशल°. B.—60. 22. जामातेति A.—60. 23. सिन्धुदत्त° A. W.—

तेति । स्रुश्रुत इत्युक्ते सोत्यहृष्यत् । अहं तु तं नयावलिप्तमश्मकेन्द्रं नयेनैवोन्मूल्य बालमेनं पित्र्ये पदे प्रतिष्ठापयेयमिति प्रतिज्ञाय कथमस्यैनां क्षुधं क्षपयेयमित्यचिन्तयम् । तावदापतितौ च कस्यापि व्याधस्य त्रीनिषूनतीत्य द्वौ मृगौ स च व्याधः । तस्य हस्तादवशिष्टमिषुद्वयं कोदण्डं चाक्षिप्याविध्यम् । एकः सपत्राकृतोन्यश्च निष्पत्राकृतोपतत् । तं चैकं मृगं दत्त्वा मृगयवेन्यापलोमत्वचः क्लोमापोह्य निष्कुलाकृत्य निकृत्योर्वस्थिग्रीवादीनि शूलाकृत्य दावाङ्गारेषु तप्तेनामिषेण तयोरात्मनश्च क्षुधमतक्षिपम् । एतस्मिन्कर्मणि मत्सौष्ठवेनातिहृष्टं किरातमस्मि पृष्टवान् । अयि जानासि माहिष्मतीवृत्तान्तमिति । असावाचष्ट । तत्र व्याघ्रत्वचो दृतीश्च विक्रीयाद्यैवागतः । किं न जानामि । प्रचण्डवर्मा नाम चण्डवर्मानुजो मित्रवर्मदुहितरं मञ्जुवादिनीं लिप्सुरभ्येतीति तेन सोत्सवा पुरीति । अथ कर्णे जीर्णमन्त्रवम् । धूर्तो मित्रवर्मा दुहितरि सम्यक्प्रतिपत्त्या मातरं विश्वास्य तन्मुखेन प्रत्याकृष्य बालकं जिघांसति । तत्प्रतिगत्य कुशलमस्य मद्वार्त्तां च देव्यै रहसि निवेद्य पुनः कुमारः शार्दूलभक्षित इति प्रकाशमाक्रोशः कार्यः । स दुर्मतिरन्तः प्रीतो बहिर्दुःखं दर्शयन्देवीमनुनेष्यति । पुनस्त्वया तन्मुखेन स वाच्यः । यदपेक्षया त्वदुक्तमत्यक्रमिषं सोपि बालः पापेन मे परलोकमगात् । अद्य तु त्वदादेशकारिण्येवाहमिति । स तथोक्तः प्रीतिं प्रतिपद्याभिपत्स्यति । पुनरनेन वत्सनाभनाम्ना महाविषेण संनीय तोयं तत्र मालां मज्जयित्वा तया स वक्षसि मुखे च हन्तव्यः। स एवायमसिप्रहारः पापीयसस्तवास्तु यद्यस्मि पतिव्रता । पुनरनेनागदेन संगमितेम्भसि तां मालां मज्जयित्वा स्वदुहित्रे देया । मृते तु तस्मिंस्तस्यां च निर्विकारायां

---

61. 1. अहं तु दुर्नयावलिप्तं A.—61. 3. A omits च.—61. 5. एकश्च B. W.—61. 6. मृगयेव दत्त्वा C. दत्त्वैकं मृगयेव, omitting तं च and मृगं, A.—61. 17. तस्या मुखेन C. तया त्वन्मुखेन W.—61. 19. तवादेशकारिणी C.—अभिपत्स्यते A.—61. 22. भवतु B. W. तवास्तु पापीयसः C.—61. 23. मृते च A.—निर्विकारायां सती सतीत्यैव A. C omits सत्यां.—

सत्यां सतीत्येवैनां प्रकृतयोनुवर्तिष्यन्ते । पुनः प्रचण्डवर्मणे संदेशयम् । अनायकमिदं राज्यम् । अनेनैव सह बालिकेयं स्वीकार्येति । तावदावां कापालिकवेषच्छन्नौ देव्यैव दीयमानभिक्षौ पुराद्बहिरुपश्मशानं वत्स्यावः । पुनरार्यप्रायान्पौरवृद्धानाप्तांश्च मन्त्रिवृद्धानेकान्ते ब्रवीतु देवी । स्वप्नेद्य मे देव्या विन्ध्यवासिन्या कृतः प्रसादः । अद्य चतुर्थेहनि प्रचण्डवर्मा मरिष्यति । पञ्चमेहनि रेवातटवर्तिनि मद्भवने परीक्ष्य वैजन्यं जनेषु निर्गतेषु कपाटमुद्घाट्य त्वत्सुतेन सह कोपि द्विजकुमारो निर्यास्यति । स राज्यमिदमनुपाल्य बालं ते प्रतिष्ठापयिष्यति । स खलु बालो मया व्याघ्रीरूपया तिरस्कृत्य स्थापितः । सा चेयं वत्सा मञ्जुवादिनी तस्य द्विजातिदारकस्य दारत्वेनैव कल्पितेति । तदेतदतिरहस्यं युष्मास्वेव गुप्तं तिष्ठतु यावदेतदुपपत्स्यत इति । स सांप्रतमित्यतिप्रीतः प्रायात् । अर्थश्चायं यथाचिन्तितमनुष्ठितोभूत् । प्रतिदिशं च लोकवादः प्रासर्पत् । अहो माहात्म्यं पतिव्रतानाम् । असिप्रहार एव हि स मालाप्रहारस्तस्मिञ्जातः । न च शक्यमुपधियुक्तमेतत्कर्मेति वक्तुम् । यतस्तदैव दत्तं तद्दाम दुहित्रे स्तनमण्डनमेव तस्यै जातं न मृत्युः । योस्याः पतिव्रतायाः शासनमतिवर्तेत स भस्मैव भवेदिति ।

अथ महाव्रतिवेषेण मां च पुत्रं च भिक्षायै प्रविष्टौ दृष्ट्वा प्रस्नुतस्तनी प्रत्युत्थाय हर्षकलमब्रवीत् । भगवन्नयमञ्जलिः । अनाथोयं जनोनुगृह्यताम् । अस्ति ममैकः स्वप्नः । स सत्यो न वेति । मयोक्तम् । फलमस्याद्यैव द्रक्ष्यसीति । यद्येवं बहु भागधेयमस्या वो दास्याः स खल्वस्याः सानाथ्यशंसी स्वप्न इति मद्दर्शनबद्धरागसाध्वसां मञ्जु-

62. 2. अमुनैव C.—62. 4. पुनराकार्यार्थिप्रायान् C.—62. 5. C omits अद्य.—62. 6. A omits मद्भवने.—62. 7. वैजनत्यं B. C. A writes परीक्षजनन्यां.—62. 8. बालमैत्रेव C. A writes बाल तै (*sic*).—62. 9. A omits मया. C. मयैव.—62. 14. A omits स.—62. 15. B W omit च.—शक्तं C.—तदेव दत्तं दाम B. W. तदेव दत्तं तावद्दाम C.—62. 17. अतिवर्तेत A.--62. 22. B C omit स खल्वस्याः.—सनथ्यशंसी B.—

वादिनीं प्रणमय्य भूयोपि सा हर्षगर्भमब्रूत । तच्चेन्मिथ्या सोयं युष्मदीयो बालकपाली श्वो मया निरोद्धव्य इति । मयापि सस्मितं मञ्जुवादिनीरागलीनदृष्टिलीढधैर्येणैवमस्त्विति लब्धभैक्षो नालीजङ्घमाकार्य निर्गम्य ततश्च तं चानुयान्तं शनैरपृच्छम् । क्वासावल्पायुः प्रथितः प्रचण्डवर्मेति । सोब्रूत । राज्यमिदं ममेत्यपास्तशङ्को राजास्थानमण्डप एव तिष्ठत्युपास्यमानः कुशीलवैरिति । यद्येवमुद्याने तिष्ठेति तं जरन्तमादिश्य तत्प्राकारैकपार्श्वे कस्यांचिच्छून्यमठिकायां मात्राः समवतार्य तद्रक्षणनियुक्तराजपुत्रः कृतकुशीलववेषलीलः प्रचण्डवर्माणमेत्यान्वरञ्जयम् । रञ्जितातपे तु समये जनसमाजज्ञानोपयोगीनि संहृत्य नृत्यगीतनानारुदितादि हस्तचङ्क्रमणमूर्ध्वपादालातपादापीडवृश्चिकमकरलङ्घनादीनि मत्स्योद्वर्तनादीनि च करणानि पुनरादायादायासन्नवर्तिनां क्षुरिकास्ताभिरुपाहितवर्ष्मा चित्रदुष्कराणि करणानि श्येनपातोत्क्रोशपातादीनि दर्शयन्विंशतिचापान्तरालावस्थितस्य प्रचण्डवर्मणः क्षुरिकयैकया प्रत्युरसं प्रहृत्य जीयाद्वर्षसहस्रं वसन्तभानुरिति गदन्मद्गात्रमुत्कर्तुमुद्यतासेः कस्यापि चारभटस्य पीवरांसबाहुशिखरमाक्रम्य तावतैव तं विचेतीकुर्वन्नाकुलं च लोकमुच्चक्षूकुर्वन्द्विपुरुषोच्छ्रितं प्राकारमत्यलङ्घयम् । अवप्लुत्य चोपवने मदनुपातिनामेष पन्था दृश्यत इति ब्रुवाण एव नालीजङ्घसमीकृतसैकतास्पष्टपादन्यासया तमालवीथ्या चारुप्राकारं प्राचा प्रतिधावितः पुनरवाचोचितटकत्वादलक्ष्यपातेन प्रद्रुत्य लङ्घितप्राकारखातवलयस्तस्यां शून्यमठिकायां तूर्णमेव प्रविश्य प्रतिमुक्तपूर्ववेषः सह

63.2. वालः कपाली A.—W omits अपि.—A writes सस्मितविहित(*sic*).—63. 5. राजोद्यानमंडपे A.—63. 6. C omits एव.—B omits तं.—63. 7. मात्रां A.—63. 8. °लीलश्च A.—63. 9. अनुरञ्जितातपे B.W.—जनममान° A. जनसमानज्ञानोपयोगी B. W. °योगिनि C.—63. 10. °रुदितानि A. रुतादि C.—63. 12. W C omit one आदाय.—63. 13. A omits करणानि.—63. 15. प्रतिहर्तुं A. परभटस्य for कस्यापि चारभटस्य A.—63. 16. A omits शिखर.—अन्यं च लोकं A.—63. 18. तदनुपातिनामेष एव. A.—A omits समीकृत—63. 21. प्रतिविमुक्त° A.—

कुमारेण मत्कर्मतुमुलराजद्वारि दुःखलब्धवर्त्मा श्मशानोद्देशमभ्यगाम् । प्रागेव तस्मिन्दुर्गागृहे प्रतिमाधिष्ठान एव मया कृतं भग्नपार्श्वस्थैर्यस्थूलप्रस्तरस्थगितबाह्यद्वारं बिलम् । अथ गलति मध्यरात्रे वर्षवरोपनीतमहार्हरत्नभूषणपट्टनिवसनौ तद्बिलमावां प्रविश्य तूष्णीमतिष्ठाव । देवी तु पूर्वेद्युरेव यथार्हमग्निसंस्कारं मालवाय दापयित्वा प्रचण्डवर्मणे चण्डवर्मणे च तामवस्थामश्मकेन्द्रोपधिकृतामेव संदिश्योत्तरेद्युः प्रत्युषस्येव पूर्वसंकेतितपौरामात्यसामन्तवृद्धैः सहाभ्येत्य भगवतीमर्चयित्वा सर्वजनप्रत्यक्षं परीक्षितकुक्षिवैजन्यं तद्भवनं विधाय तद्दत्तदृष्टिः सह जनेन स्थित्वा पटीयांसं पटहशब्दमकारयत् । अणुतररन्ध्रप्रविष्टेन तेन नादेनाहं दत्तसंज्ञः शिरसैवोत्क्षिप्य सप्रतिमं लोहपादपीठमंसलपुरुषप्रयत्नदुश्चलमुभयकरविधृतैकपार्श्वमेकतो निवेश्य निरगमम् । निरगमयं च कुमारम् । अथ यथापुरमर्पयित्वा दुर्गामुद्घाटितकपाटः प्रत्यक्षीभूय प्रत्ययहृष्टदृष्टि स्पष्टरोमाञ्चमुद्यताञ्जलि रूढविस्मयं च प्रणिपतन्तीः प्रकृतीरभ्यधाम् । इत्थं देवी विन्ध्यवासिनी मन्मुखेन युष्मानाज्ञापयति । स एष राजसूनुरापन्नो मया सकृपया शार्दूलरूपेण तिरस्कृत्याद्य वो दत्तः । तमेनमद्यप्रभृति मत्पुत्रतयामन्दमातृपक्ष इति परिगृह्णन्तु भवन्तः । अपि च दुर्घटकूटकोटिघटनापाटवप्रकटशाठ्यनिष्ठुराश्मकघटघट्टनात्मानं मां मन्यध्वमस्य रक्षितारम् । रक्षानिर्वेशश्चास्य स्वसेयं सुभ्रूरभ्यनुज्ञाता मह्यमार्ययेति । श्रुत्वैतदहो भाग्यवान्भोजवंशो यस्य त्वमार्यादत्तो नाथ इत्यप्रीयन्त प्रकृतयः । सा तु वाचामगोचरां हर्षावस्थामस्पृ-

64. 1. तुमुले C.—अध्यगाम् A.—64. 5. B omits एव.—दत्त्वा B. W.—64. 6. A C W omit चण्डवर्मणे. It is supplied in the margin in C.—64. 8. सर्वजनत्यं तद्भवनं A.—64. 9. सदंतदृष्टिः B. संदत्तदृष्टिः C. दत्तदृष्टिः W. तद्दत्तदृष्टिरेव A.—64. 10. अनुतरं W.—A omits नादेन.—64. 11. दुश्चरं A.—विधृतपार्श्वं A.—64. 12. यथापूर्वं W.—64. 13. प्रत्यक्षीभूय हृष्टदृष्टस्पष्टरोमांचम् A.—64. 14. प्रतिपतन्ती A. इत्थं मन्मुखेन, &c. C.—64. 15. स एव A. B W omit this clause.—64. 16. शार्दूलरूपया A.—64. 18. प्रकटशाक्य B.—64. 19. A puts अस्य after स्वसेयं.—रक्षा°, &c.—A omits this sentence.—B C omit मह्यं ममार्पयेति. C.—भाग्यं भाग्यवान् C.

